Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ८३८ - घ

Title सूर्यसिद्धान्तः

Author

Extent २३ Age

Subject ज्योतिषम् सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ८३८-घ

सूर्यसिद्धान्तः (संपूर्णः)

२३

नं० ८३८-घ

पत्राणि २३

(ज्योतिषम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ८३८ - घ
सूर्यसिद्धान्तः (ज्योतिषम्)
पत्राणि २३ (सम्पूर्णम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥या देवी स्तूयते नित्यं ब्रह्मेंद्रमुनिकिन्नरैः। सा मे वसतु जिह्वाग्रे पद्महस्ता सरस्वती।१। रकारोच्चारणादेव मुखान्निर्याति पातकं। पुनः प्रविशती सर्वं मकारस्तु कपाटकं।१। रुद्रोन नग्नः कविः काणः धनिः पंगुः स्तथी शशी। रामो दुःखी वली वृते न दुःखं पंचभिः सह।१। सजातीया द्विजाः सर्वे क्रिया तत्र गरीयसी। यत्र यत्र क्रियाश्रेष्ठा तत्र तत्र कुलीनता।१। पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितं। मूढैः पाषाणखंडेषु रत्नसंज्ञाभिधीयते।१। हंसाः पद्मवनाशया मधुलिहः सौरभ्य गंधाशया कीटाः स्वादुफलाशया वलिभुजो गृध्राश्च मांसाशया। दूराद्दर्शितकाय कांतिनिकरैर्निःसारमिथ्योन्नतेरे शाल्मलिपादप प्रतिदिनं केन त्वया वंचिताः।१।

सूर्यसिद्धांत मूलं पत्र

प. ४ मध्यमाधिकारः ६५
७ स्पष्टाधिकारः ७०
१० त्रिप्रश्नाधिकारः ५४
११ चंद्रपर्व २६
१२ सूर्यपर्व १७
१३ परिलेख २८
१३ समागमाध्या. २४
१४ नक्षत्रध्रुवयोग. २१
१५ ग्रहोदयास्ताधिकारः १०
१६ चंद्रोदयशृंगोन्नति. १५
१७ पाताध्यायः २२
१७ भूगोलाध्यायः ९०
१९ यंत्राध्यायः २६
१९ मानाध्यायः २८

CC-0) Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कृतयुगे स्वल्पावशिष्टे सति भूमिकस्ताद्दशांशे लंकायाः प्राक्‌शाल्मलेदेशे मयो नाम महासुरः तपस्तेपे इत्यन्वयः ==२

एतादृशाय ब्रह्मणे स्वरूपध्यानासंभवान्नमस्कार एव समुचित इति भावः ==२

॥६॥ श्रीगणेशाय नमः॥ अचिंत्याव्यक्तरूपाय निर्गुणाय गुणात्मने॥ समस्तजगदाधार मूर्तये ब्रह्मणे नमः॥ १॥ अल्पावशिष्टे तु कृते मयो नाम महासुरः॥ रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम्॥ २॥ वेदांगमग्र्यमखिलं ज्योतिषां गतिकारणं॥ आराधयन्विवस्वंतं तपस्तेपे सुदुस्तरं॥ ३॥ तोषितस्तपसा तेन प्रीतस्तस्मै वरार्थिने॥ ग्रहाणां चरितं प्रादान्मयाय सविता स्वयं॥ ४॥ श्रीसूर्य उवाच॥ विदितस्ते मया भावस्तपसा तोषितो स्म्यहं दद्यां कालाश्रयं ज्ञानं ग्रहाणां चरितं महत् ५ न मे तेजःसहः कश्चिदाख्यातुं नास्ति मे क्षणः मदंशः पुरुषोयं ते निःशेषं कथयिष्यति ६ इत्युक्त्वांतर्दधे देवः समादिश्यांशमात्मनः स पुमान् मयमाहेदं प्रणतं प्रांजलिस्थितं ७ सूर्यपुरुष उवाच॥ शृणुष्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमं युगे युगे महर्षीणां स्वयमेव विवस्वता ८ शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्करः युगानां परिवर्त्तेन कालभेदोत्र केवलः ९ लोकानामंतकृत्कालः कालोन्यः कलनात्मकः स द्वि

ब्रह्मादिसिद्धांतास्सर्वे मे वायं कथित इति भावः ==३

भागवतेह् तासुरवाक्यं। लोकाः सपालाः यस्येमे श्वसंति विवशा वशे। द्विजा इव शिचा वद्धाः स कालः इह कारणं। २। द्विजाः पक्षिणः शिचाजालेन ==१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

धास्थूलसूक्ष्मत्वान्मूर्त्तश्चामूर्त्तउच्यते १० प्राणादिःकथितोमूर्त्तस्त्रुट्याद्योमूर्त्तसंज्ञकः ष
ड्भिःप्राणैर्विनाडीस्यात्तत्षष्ट्यानाडिकास्मृता ११ नाडीषष्ट्यातुनाक्षत्रमहोरात्रंप्रकीर्त्तितं त्रिंश
ताभवेन्मासःसावनोर्कोदयैस्तथा १२ ऐंदवस्तिथिभिस्तद्वत्संक्रांत्यासौरउच्यते मासैर्द्वादश
भिर्वर्षंदिव्यंतदहउच्यते १३ देवासुराणामन्योन्यमहोरात्रंविपर्ययात् तत्षष्टिःषड्गुणावर्षंदि
व्यमासुरमेवच १४ तद्द्वादशसहस्राणिचातुर्युगमुदाहृतं सूर्याब्दसंख्ययाद्वित्रिसागरैरयु
४३२००००
ताहतैः १५ संध्यासंध्यांशसहितंविज्ञेयंतच्चतुर्युगं कृतादीनांव्यवस्थेयंधर्मपादव्यवस्थया
१६ युगस्यदशमोभागश्चतुस्त्रिद्व्येकसंगुणः क्रमात्कृतयुगादीनांषष्ठांशःसंधयोःस्वकः
१७ युगानांसप्ततिःसैकामन्वंतरमिहोच्यते कृताब्दसंख्यातस्यांतेसंधिःप्रोक्तोजलप्लवः १८
ससंधयस्तेमनवःकल्पेज्ञेयाश्चतुर्दश कृतप्रमाणःकल्पादौसंधिःपंचदशःस्मृतः १९ इत्थंयु
गसहस्रेणभूतसंहारकारकः कल्पोब्राह्ममहःप्रोक्तंशर्वरीतस्यतावती २० परमायुःशतंत
स्यतयाहोरात्रसंख्यया आयुषोर्द्धमितंतस्यशेषःकल्पोयमादिमः २१ कल्पादस्माच्चमन

स्वायंभुवः१स्वारोचिषः२उत्तमजः३ तामसः४रैवतः५चाक्षुषः६वैवस्वतः७ अग्निसावर्णिः८दक्षसावर्णिः९ ब्रह्मसावर्णिः१०
धर्मसावर्णिः११रुद्रसावर्णिः१२देवसावर्णिः१३इंद्रसावर्णिः१४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्पष्टाद् इतः ग्रहाः नक्षत्रैः सह सततं अतिजवात् पश्चाद्व्रजंतोपि स्वमार्गगाः स्वकक्षास्थाः सर्वेषां योजनात्मिकया गत्या तुल्यमे
व बलं व्रजंतो गच्छंती स्पर्धाः। जीयमानाः स्व परस्परं जेतुकामाः = २

वः षड्व्यतीताः ससंधयः वैवस्वतस्य च मनोर्युगानां त्रिघनो गतः २२ अष्टाविंशाद्युगा
दस्माद्यातमेतत्कृतं युगं अतः कालं प्रसंख्याय संख्यामेकत्र पिंडयेत् २३ ग्रहर्क्षदेवदै
सर्ववर्षसंख्या या १७०६४००० = ३ त्यादि सृजतोस्य चराचरं कृताद्रिवेदा दिव्याब्दाः शतघ्ना वेधसो गताः २४ पश्चाद्व्रजंतोति
जवान्नक्षत्रैः सततं ग्रहाः जीयमानास्तु लंबंते तुल्यमेव स्वमार्गगाः २५ प्राग्गतित्वमत
स्तेषां भगणैः प्रत्यहं गतिः परिणाहवशाद्भिन्ना तद्वशाद्भानि भुंजते २६ शीघ्रगस्तान्य
थाल्पेन कालेन महताल्पगः तेषां तु परिवर्त्तेन पौष्णांते भगणः स्मृतः २७ विकलानां क
ला षष्ट्या तत्षष्ट्या भाग उच्यते तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते २८ युगे सूर्यज्ञशु
तुं ४ क्राणां खचतुष्करदार्णवाः कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनां २९ इंदो रसाग्नित्रि
का ३ त्रीषुसप्तभूधरमार्गणाः दस्रत्र्यष्टरसांकाक्षिलोचनानि कुजस्य तु ३० बुधशीघ्रस्य शून्य २
र्तुखाद्रित्र्यंकनगेंदवः बृहस्पतेः खदस्राक्षिवेदषड्वह्नयस्तथा ३१ सितशीघ्रस्य षट्सप्
तत्रियमाश्विखभूधराः शनेर्भुजंगषट्पंचरसवेदनिशाकराः ३२ चंद्रोच्चस्याग्निशून्या

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative.

भवंति भोदया १५८२२३७८२८ भानुभगणैनो ४३२०००० निताः कुहाः १५९३३३६

द्विवसुसर्पार्णवायुगे [२२२३२२८] वामं पातस्य वस्वग्नियमाश्विशिखिदस्रका: ३३ उदयादुदयं भानो
र्भूमिसावनवासरा: वसु [१५७७९१७८२८] द्व्यष्टाद्रिरूपांकसप्ताद्रितिथयो युगे ३४ भानामष्टाक्षिवस्वद्रित्रिद्वि [१५८२२३७८२८]
द्व्यष्टशरेंदव: चांद्रा: [१६०३०००८०] खाष्टखखव्योमखाग्निखर्तुनिशाकरा: ३५ षड्वह्नित्रिहुताशांकतिथ [१५९३३३६]
यश्चाधिमासका: ~~भोदया भगणै: स्वै: स्वैरूना: स्वस्वोदया युगे~~ ३६ तिथिक्षया यमार्थाक्षि [२५०८२२५२]
द्व्यष्टव्योमशराश्विन: ३६ [५२५८४०८००] खचतुष्कसमुद्राष्टकुपंच रविमासका: भोदया भगणै: स्वै: स्वैरू
नाः स्वस्वोदया युगे ३७ भवंति शशिनो मासा: सूर्येंदुभगणांतरं रविमासोनितास्ते तु शे
षा: स्युरधिमासका: ३८ सावनाहानि चांद्रेभ्यो द्युभ्य: प्रोध्य तिथिक्षया: अधिमासोनरात्र्य
र्क्षचांद्रसावनवासरा: ३९ एते सहस्रगुणिता: कल्पे स्युर्भगणादय: प्राग्गते: सूर्यमंदस्य
कल्पे सप्ताष्टवह्नय: [३८७] ४० कौजस्य वेदखयमा [२०४] बौधस्याष्टर्तुवह्नय: [३६८] खखरंध्राणि [९००] जैवस्य शौ
क्रस्यार्थगुणेषव: [५३५] ४१ गोऽग्नय: [३९] शनिमंदस्य पातानामथ वामत: मनुदस्रास्तु [२१४] कौजस्य बौध
स्याष्टाष्टसागरा: ४२ कृताद्रिचंद्रा जैवस्य त्रिखांकाश्च भृगोस्तथा शनिपातस्य भगणा: प्रोक्ता कल्पे

६६२
यमरसर्त्त्ववः ४३ भगणाः सर्वमेवात्र प्रोक्ताश्चंद्रोच्चपातयोः षण्मनूनां तु संपिंड्य कालं तत्संधि
२ भिः सह ४४ कल्पादिसंधिना सार्द्धं वैवस्वतमनोस्तथा युगानां त्रिघनं यातं तथा कृतयुगं त्वि
3 दं ४५ प्रोक्तसंख्येस्ततः कालं सर्वाः क्रमदिवसंख्यया सूर्याब्दसंख्यया ज्ञेयाः कृतस्यांते गता अ
१९५३७२००००
मी ४६ खचतुष्कयमाद्र्यग्निशररंध्रनिशाकराः अत ऊर्द्धममी युक्ता गतकालाब्दसंख्यया
४७ मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः पृथक्स्थास्तेऽधिमासघ्नाः सूर्यमासविभाजि
ताः ४८ लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः द्विष्ठास्तिथिक्षयाभ्यस्ताश्चांद्रवासरभा
जिताः ४९ लब्धोनरात्ररहिता लंकायामर्द्धरात्रिकः सावनो द्युगणः सूर्याद्दिनमासाब्द
पास्ततः ५० सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः मासाब्ददिनसंख्याप्तं द्वित्रिघ्नं रूपसंयुतं
५१ सप्तोद्धृतावशेषौ तु विज्ञेयौ मासवर्षपौ यथास्वभगणाभ्यस्तो दिनराशिः कुवासरैः ५२ वि
भाजितो मध्यगत्या भगणादिर्ग्रहो भवेत् एवं स्वशीघ्रमंदोच्चा ये प्रोक्ताः पूर्वयायिनः ५३ विलोम
गतयः पातास्तद्वच्चक्राद्विशोधिताः द्वादशघ्ना गुरोर्याता भगणा वर्तमानकैः ५४ राशिभिः स २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हिताः शुद्धाः षष्ट्यास्तु विजयादयः विस्तरेणैतदुदितं संक्षेपाद्व्यावहारिकं ५५ मध्यमानयनं का
र्यं ग्रहाणामिष्टतो युगात् अस्मिन्कृतयुगस्यांते सर्वे मध्यगता ग्रहाः ५६ विनेंदुपातमंदोच्चान्मे
षादौ तुल्यतामिताः मकरादौ शशांकोच्चं तत्पातस्तु तुलादिगः ५७ निरंशत्वं गताश्चान्ये नोक्तास्ते मंद-
चारिणः योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु ५८ तद्वर्गतो दशगुणात्पदं भूपरिधिर्भवेत् लं =नहालये तेनज्ञा २८७५।३७
बज्याघ्नस्त्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः ५९ तेन देशांतराभ्यस्ता ग्रहभुक्तिर्विभाजिता कला
दि तत्फलं प्राच्यां ग्रहेभ्यः प्रविशोधयेत् ६० रेखाप्रतीचीसंस्थाने प्रक्षिपेत्स्युः स्वदेशजाः राक्षसा
लयदेवौकःशैलयोर्मध्यसूत्रगाः ६१ रोहीतकमवंती च तथा सन्निहितं सरः अतीत्योन्मीलना
दिंदोर्दिक्सिद्धिर्गणितागतात् ६२ यदा भवेत्तदा प्राच्यां स्वस्थानं मध्यतो भवेत् अप्राप्य वा भवेत्पश्चा
देवं वापि निमीलनात् ६३ तयोरंतरनाडीभिर्हन्याद्भूपरिधिं स्फुटं षष्ट्या विभज्य लब्धैस्तु योजनैः
प्रागथापरैः ६४ स्वदेशपरिधिर्ज्ञेयः कार्यं देशांतरं हितैः वारप्रवृत्तिः प्राग्देशे क्षपार्धेऽभ्यधि
के भवेत् ६५ तद्देशांतरनाडीभिः पश्चादूने विनिर्दिशेत् इष्टनाडीगुणा भुक्तिः षष्ट्या लब्धं कलादि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कं ६८ गतेशोध्यं युतं गम्ये कृत्वा तात्कालिको भवेत् भचक्रलिप्ताशीत्यंशं परमं दक्षिणोत्तरं ६७
४ विक्षिप्यते स्वपातेन स्वकान्त्यन्तादनुष्णगुः तन्नवांशं द्विगुणितं जीवस्त्रिगुणितं कुजः ६८ बुधशु
५ क्रार्कजाः पाते विक्षिप्यन्ते चतुर्गुणं एवं त्रिघनरंध्रार्करसार्काकदशाहताः ६९ चंद्रादीनां क्रमादेता चं ३० मं ९० बु १२० बृ ६० शु १२० श १२० = ३
मध्यविक्षेपलिप्तिकाः इति सूर्यसिद्धांते मध्यमगतिविवरणं प्रथमं १ अदृश्यरूपाः कालस्य मूर्त्त
यो भगणाश्रिताः शीघ्रमंदोच्चपाताख्या ग्रहाणां गतिहेतवः १ तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपा
णिभिः प्राक्पश्चादपकृष्यंते यथासन्नं स्वदिङ्मुखं २ प्रवहाख्यो मरुत्तांस्तु स्वोच्चाभिमुखमीर
येत् पूर्वापरापकृष्टास्ते गतिं यांति पृथग्विधां ३ ग्रहात्प्राग्भगणार्धस्थः प्राङ्मुखं कर्षति ग्रहं उ
च्चसंज्ञोपरार्धस्थस्तद्वत्पश्चान्मुखं ग्रहं ४ स्वोच्चापकृष्टा भगणैः प्राङ्मुखं यांति यद्ग्रहाः तत्तेषु
धनमित्युक्तं मृणं पश्चान्मुखेषु च ५ दक्षिणोत्तरयोरेवं पातो राहुः स्वरंहसा विक्षिपत्येष विक्षे ४
पञ्चंद्रादीनामपक्रमात् ६ उत्तराभिमुखं पातो विक्षिपत्यपरार्धगः ग्रहं प्राग्भगणार्धस्थो याम्या
यामपकर्षति ७ बुधभार्गवयोः शीघ्रात्तद्वत्पातो यथास्थितः तच्छीघ्राकर्षणात्तौ तु विक्षेप्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तेयथोक्तवत् ८ महत्त्वान्मंडलस्यार्कः स्वल्पमेवापकृष्यते मंडलाल्पतयाचंद्रस्ततोवह्वप
कृष्यति ९ भौमादयोऽल्पमूर्त्तित्वाच्छीघ्रमंदोच्चसंज्ञकैः दैवतैरपकृष्यंते सुदूरमतिवेगतः
१० अतोधनर्णंसुमहत्तेषांगतिवशाद्भवेत् आकृष्यमाणास्तैरेवंव्योम्नियांत्यनिलाहताः ११ व
= ति=४ कुटि=४ क्रानुवक्राविकलामंदामंदतरासमाः तथाशीघ्राशीघ्रतराग्रहाणामष्टधागतिः १२ तत्राति
शीघ्राशीघ्राख्यामंदामंदतरासमा ऋज्वीपंचविधाज्ञेयायावक्रासानुवक्रगा १३ तत्तद्गति
वशान्नित्यंयथादृक्तुल्यतांग्रहाः प्रयांतितत्प्रवक्ष्यामिस्फुटीकरणमादरात् १४ राशिलि
प्ता१८००ष्टमोभागः स्यप्रथमंज्यार्द्धमुच्यते तत्तद्विभक्तलब्धोनमिश्रितंतत्द्वितीयकं
१५ आद्येनैवंक्रमात्पिंडान्भक्त्वालब्धोनितैर्युताः खंडकेस्युश्चतुर्विंशज्यार्द्धपिंडाः क्रमादमी
१६ तत्त्वाश्विनोंकाब्धिकृतारूपभूमिधरर्त्तवः खांकाष्टौपंचशून्येशावाणरूपगुणेंदवः
१७ शून्यलोचनपंचैकाछिद्ररूपमुनींदवः वियच्चंद्रातिधृतयोगुणरंध्रांवराश्विनः १८ मुनि
षड्यमनेत्राणिचंद्राग्निकृतदस्रकाः पंचाष्टविषयाक्षीणिकुंजराश्विनगाश्विनः १९ रं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रपंचाष्टकयमावस्वष्टांकयमास्ततः कृताष्टभ्रन्यज्वलनानगाद्रिशशिवह्नयः २० ष
५ ट्पंचलोचनगुणाभ्रांकनेत्राग्निवह्नयः यमाद्रिवह्निज्वलनारंध्रभ्रून्यार्कवाग्नयः २१ रू
5 पाग्निसागरगुणावसुत्रिकृतवह्नयः प्रोक्षोत्क्रमेण व्यासार्द्धदुत्क्रमज्यार्द्धपिंडकाः २२ मु
नयोरंध्रयमलारसषट्कामुनीश्वराः द्व्यष्टेकारूपषड्दस्राः सागरार्थहुताशनाः २३ ख
नवा र्तुवेदाश्चषाद्रिग्निनगास्त्वर्थकुंजराः नगोवरवियच्चंद्रारूपभूधरशंकराः २४ शराशिव
हुताशैकाभुजंगाग्निशरेंदवः नवरूपमहीध्रेकागजेकांकनिशाकराः २५ गुणाश्विरूप
नेत्राणि पावकाग्निगुणाश्विनः वस्वर्णवार्थयमलास्तुरंगर्तुनगाश्विनः २६ नवाष्टनव
नेत्राणि पावकैकयमाग्नयः
अष्टाग्निसागरगुणाउत्क्र
मज्यार्द्धपिंडकाः २७ परमाय
क्रमज्यानुसप्तरंध्रगुणेंदवः
२२७ तद्गुणज्योत्रिजीवाप्ता

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४
२२५	४४९	६७१	८९०	११०५	१३१५	१५२०	१७१९	१९१०	२०९३	२२६७	२४३१	२५८५	२७२८	२८५९	२९७८	३०८४	३१७७	३२५६	३३२१	३३७२	३४०९	३४३१	३४३८
२२४	२२२	२१९	२१५	२१०	२०५	१९९	१९१	१८३	१७४	१६४	१५४	१४३	१३१	११९	१०६	९३	७९	६५	५१	३७	२२	७	००
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४
७	२९	६६	११७	१८२	२६१	३५४	४६०	५७९	७१०	८५३	१००७	११७१	१३४५	१५२८	१७१९	१९१८	२१२३	२३३३	२५४७	२७६४	२९८३	३२१२	३४३८
२२	३७	५१	६५	७९	९३	१०६	११९	१३१	१४३	१५४	१६४	१७४	१८३	१९१	१९९	२०५	२१०	२१५	२१९	२२२	२२४	२२५	००

५

त्रिज्यातुल्ययादोर्ज्ययापरक्रांतिज्यालभ्यते तदा इष्टदोर्ज्यायाका फलं इष्टक्रांतिज्या = १

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तच्चापं क्रांतिरुच्यते २८ ग्रहं संशोध्य मंदोच्चात्तथा शीघ्राद्विशोध्य च शेषं केंद्रं पदैस्तस्माद्भुज
ज्या कोटिज्यके च २९ गताद्भुजज्या विषमे गम्यात्कोटिः पदे भवेत् समे तु गम्याद्बाहुज्या कोटिज्या
तु गताद्भवेत् ३० लिप्तास्तत्त्वयमैर्भक्ता लब्धं ज्यापिंडकं गतं गतगम्यांतराभ्यस्तं विभजेत्तत्त्वलो
चनैः ३१ तदवाप्तफलं योज्यं ज्यापिंडे गतसंज्ञके स्यात्क्रमज्याविधिरयमुत्क्रमज्यास्वपि स्मृ
तः ३२ ज्यां प्रोज्झ्य शेषं तत्त्वाश्वि २२५ हतं तद्विवरोद्धृतं संख्यातत्त्वाश्विसंवर्गे संयोज्यं धनुरुच्य
ते ३३ रवेर्मंदपरिध्यंशा मनवः १४ शीतगो रदाः ३२ युग्मांते विषमांते च नखलिप्तोनितास्तयोः =रविः १३|४० चंद्रः ३१|४०
३४ युग्मांतेऽर्थाद्रयः ७५ खाग्निः ३० सुराः ३३ सूर्या १२ नवेषवः ४९ ओजे द्व्यगा ७२ वसुयमा २८ र
दा ३२ रुद्रा ११ गजाब्धयः ४८ ३५ कुजादीनामतः शीघ्रा युग्मांतेऽर्थाग्निदस्रकाः २३५ गुणाग्निचं
द्राः १३३ खनगा ७० द्विरसाक्षीणि २६२ गोऽग्नयः ३९ ओजांते द्वित्रिकयमा २३२ द्विविश्वे १३२ यमपर्वताः
७२ खर्तुदस्राः २६० वियद्वेदाः ४० शीघ्रकर्मणि कीर्तिताः ३७ ओजयुग्मांतरगुणा भुजज्या त्रिज्यया
हृता युग्मवृत्ते धनर्णं स्यादोजादूनेऽधिके स्फुटः ३८ तद्गुणे भुजकोटिज्ये भगणांशैः ३६० विभाजि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ते तद्भुजज्याफलधनुर्मांदं लिप्तादिकं फलं ३९ शैघ्रं कोटिफलं केंद्रे मकरादौ धनं स्मृतं संशो
६ ध्यं तु त्रिजीवायां कर्कादौ कोटिजं फलं ४० तद्बाहुफलवर्गैक्यान्मूलं कर्णश्चलाभिधः त्रिज्या
भ्यस्तं भुजफलं चलकर्णविभाजितं ४१ लब्धस्य चापं लिप्तादिफलं शैघ्रमिदं स्मृतं एतदादौ कुल
6 जादीनां चतुर्थे चैव कर्मणि ४२ मांदं कर्मैकमर्केंद्वोर्भौमादीनामथोच्यते शैघ्रं मांदं पुनर्मांदं शै
घ्रं चत्वार्यनुक्रमात् ४३ अजादिकेंद्रे सर्वेषां मांदे शैघ्रे च कर्मणि धनं ग्रहाणां लिप्तादि तुलादावृण
मेव तत् ४४ अर्कबाहुफलाभ्यस्ता ग्रहभुक्तिर्विभाजिता भचक्रकलिकाभिस्तु लिप्ताः कार्या ग्र
हार्कवत् ४५ मध्येशीघ्रफलस्यार्द्धं मांदमर्द्धफलं तथा मध्यग्रहे मांदफलं सकलं शैघ्रमेव च ४६
स्वमंदभुक्तिसंशुद्धा मध्यभुक्तिर्निशापतेः दोर्ज्यांतरादिकं कृत्वा भुक्तावृणधनं भवेत् ४७ ग्रह
भुक्तेः फलं कार्यं ग्रहवन्मंदकर्मणि दोर्ज्यांतरगुणा भुक्तिस्तत्त्वनेत्रो २२५ द्धृता पुनः ४८ स्वमंद ६
परिधिक्षुण्णा भगणांशो २१६० द्धृताः कलाः कर्कादौ तु धनं तत्र मकरादावृणं स्मृतं ४९ मंदस्फु
टीकृतां भुक्तिं प्रोह्य शीघ्रोच्चभुक्तितः तच्छेषं विवरेणाथ हन्यात्त्रिज्यांतकर्णयोः ५० चलक

कोटिफलं त्रिज्या यां याज्यमि स्पष्टं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ण्हितं भुक्तौ कलौ त्रिज्याधिके धनं ऋणमूनेधिके प्रोह्य भुक्तिं वक्रगतिर्भवेत् ५१ दूरःस्थितःस्व
शीघ्रोच्चाद्ग्रहः शिथिलरश्मिभिः सव्येतराकृष्टतनुर्भवेद्वक्रगतिस्तदा ५२ महत्वाच्छीघ्रपरिधेः
सप्तमे भृगुभूसुतौ अष्टमे जीवशशिजौ नवमे तु शनैश्चरः ५३ कृतर्तुचंद्रैः १६४ वेदेंद्रैः १४४ शून्य
त्र्येकैः १३० गुणाष्टिभिः १६३ शररुद्रैः ११५ श्चतुर्थेषु केंद्रांशैर्भूसुतादयः ५४ भवंति वक्रिणस्तैस्तु
स्वैः स्वैश्चक्राद्विशोधितैः अवशिष्टांशतुल्यैः स्वैः केंद्रैरुज्झंति वक्रितां ५५ तत्कियत्समाना भा
गाः कुजस्य १९६ बुधस्य २१६ गुरोः २२० शुक्रस्य १९७ शनेः २४५ कुजार्किगुरुपातानां ग्रहवच्छीघ्रजं
फलं वामं तृतीयकं मांदं बुधभार्गवयोः फलं ५६ स्वपातोनाद्ग्रहाज्जीवा शीघ्राद्भृगुजसौम्ययोः क्रांतेरुत्तरत्वा दुत्तरं दक्षिण
विक्षेपघ्न्यंत्यकर्णाप्ता विक्षेपस्त्रिज्यया विधोः ५७ विक्षेपापक्रमैकत्वे क्रांतिर्विक्षेपसंयुता दिग्भे त्वाद्दक्षिणं ८५
दे वियुता स्पष्टा भास्करस्य यथागता ५८ ग्रहोदयप्राणहता खखाष्टैकोद्धृता १८०० गतिः च
क्रासवो १८०० लब्धयुताः स्वाहोरात्रासवः स्मृताः ५९ क्रांतेः क्रमोत्क्रमज्ये द्वे कृत्वा तत्रोत्क्रम
ज्यया हीना त्रिज्या ३४३८ दिनव्यासदलं तद्दक्षिणोत्तरं ६० क्रांतिज्याविषुवद्भाघ्नी क्षितिज्याद्वाद

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शोधृता त्रिज्यागुणाहोरात्रार्द्धकर्णाप्ताचरजासवः ६१ तत्कार्मुकमुदक्क्रांतौ धनहानी पृथक्स्थिते
स्वाहोरात्रचतुर्भागे दिनरात्रिदले स्मृते ६२ याम्यक्रांतौ विपर्यस्ते द्विगुणे ते दिनक्षये विक्षेपयुक्तोनित
७ या क्रांत्या भानामपि स्वके ६३ भभोगोष्टशतीलिप्ताः ८०० खाश्विशैला ७२० स्तथा तिथेः ग्रहलिप्ताभ
भोगाप्तानि भानि भुक्त्या दिनादिकं ६४ रवींदुयोगलिप्ताभ्यो योगा भभोगभाजिताः योगाः शेषात्तु तिथि
वन्नाड्यो भुक्त्यैक्यभाजिताः ६५ अर्कोनचंद्रलिप्ताभ्यस्तिथयो भोगभाजिताः गतगम्याश्च षष्टि
घ्ना नाड्यो भुक्त्यंतरोद्धृताः ६६ ध्रुवाणि शकुनिर्नागं तृतीयं तु चतुष्पदं किंस्तुघ्नं तु चतुर्दश्याः कृ
ष्णायाश्चापरार्द्धतः ६७ ववादीनि ततः सप्त चराख्यकरणानि च मासेऽष्टकृत्व एकैकं करणं परिव
र्त्तते ६८ तिथ्यर्द्धभोगं सर्वेषां करणानां प्रकल्पयेत् एषा स्फुटगतिः प्रोक्ता सूर्यादीनां खचारिणां
६९ अर्कोनचंद्रात्खरसाग्निलब्धं रूपोनितं सप्तहृतावशेषं ववादिकं चैव चराख्यकं तत्तसेवनाड्य ८
स्तिथिवद्भवंति ७० इति श्रीसूर्यसिद्धांते ग्रहस्पष्टगत्यध्यायो द्वितीयः २ शिलातलेंबुसंशुद्धे
वज्रलेपेपि वा समे तत्र शंक्वंगुलैरिष्टैः समं मंडलमालिखेत् १ तन्मध्ये स्थापयेच्छंकुं कल्पना
द्वादशांगुलं १ तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्द्धयोः २ तत्र बिंदू विधायोभौ वृत्ते पूर्वापराभिधौ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तत्र चतुरस्रे वक्ष्यमाणभुजसूत्रांगुलैः प्राच्यपररेखातो दत्तैरिष्टप्रभामतइष्टभागं भवतीत्यर्थः ॥२

तन्मध्ये तिमिना रेखा कर्त्तव्या दक्षिणोत्तरा । ३ याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा
दिग्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि ४ चतुरस्रं वहिः कुर्यात्सूत्रैर्मध्याद्विनिर्गतैः
भुजसूत्रांगुलैस्तत्र दत्तैरिष्टप्रभामता ५ प्राक्पश्चिमाश्रिता रेखा प्रोच्यते सममंडलं उ
न्मंडलं च विषुवन्मंडलं परिकीर्त्तितं ६ रेखा प्राच्यपरा साध्या विषुवद्भाग्रगा तथा इष्टच्छा
याविषुवतोर्मध्यमग्राभिधीयते ७ शंकुच्छायाकृतियुतेर्मूलं कर्णोस्य वर्गतः प्रोह्य शंकुकृ
तिं मूलं छायाशंकुर्विपर्ययात ८ अयनांशोत्पत्तिः त्रिंशत्कृत्यो युगे भानां चक्रं प्राक्परिलं
वते तद्गुणाद्भूदिनैर्भक्ताद्द्युगणाद्यदवाप्यते ९ तद्दोस्त्रिघ्नाद्दशांशाप्ता विज्ञेया अयनाभि
धाः तत्संस्कृताद्ग्रहात्क्रांतिछायाचरदलादिकं १० स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्द्व
ये प्राक्चक्रं चलितं हीने छायार्कात्करणागते ११ अंतरांशैरथावृत्य पश्चाच्छेषैस्तथाधि
के एवं विषुवती छाया स्वदेशे या दिनार्द्धजा १२ दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा शंकु
छायाहते त्रिज्ये विषुवत्कर्णभाजिते १३ लंबाक्षज्ये तयोश्चापे लंबाक्षौ दक्षिणौ सदा मध्यछा

कृतिशब्देनाव
प्राप्तिः। त्रिंशत्कृत्या
तावंशतिरित्य
र्थः ॥६

त्रिक त्रिक·
१२को पलः
विक· विक

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१२को अज्याभुः लंको० =२ अक्षज्या१२र्कगुणा२ लंबज्ययाभाज्यापलभाभवतीत्यर्थः =२

याभुजस्तेनगुणिताविभमौर्विका १४ स्वकर्णघ्नाधनुर्लिप्तानतास्ताद्दक्षिणेभुजे उत्तराश्चोन्तरेयाम्या
८ स्ताः सूर्याक्रांतिलिप्तिकाः १५ दिग्भेदेमिश्रिताःसाम्येविश्लिष्टाश्चाद्यलिप्तिकाः तज्ज्यात्रिज्यायुतवध
र्गश्रोध्यत्रिज्याकृतेःपदं १६ लंबज्यार्कगुणीत्रिज्याविषुवच्छावलंबया अथछायार्कसाधनं स्वाक्षा
युतिविश्लेषः
र्कनतभागानांदिक्साम्येंतरमन्यथा १७ दिग्भेदेपक्रमःशेषस्तस्यज्यात्रिज्ययाहता परमा
पक्रमज्याप्ताचापंमेषादिगोरविः १८ कर्कादौप्रोह्यचक्रार्धात्तुलादौभार्धसंयुतः मृगादौप्रो
ह्यभगणान्मध्याह्नेऽर्कःस्फुटोभवेत् १९ अथमध्यमार्कानयनं तन्मांदमसकृद्ग्राह्यंफलंमध्यो
दिवाकरः अथमध्याह्नछायासाधनं स्वाक्षार्कापक्रमयुतिर्दिक्साम्येंतरमन्यथा २० शेषं
नतांशाःसूर्यस्यतद्बाहुज्याथकोटिजा शंकुमानांगुलाभ्यस्तेभुजत्रिज्येयथाक्रमं २१ कोटि
छायाचकर्ण अच्छायाकर्णः = ज्ययाविभज्याप्तेछायाकर्णावहर्दले अथअर्काग्रादिसाधनं २२ क्रांतिज्याविषुवत्कर्ण
हताप्ताशंकुजीवया अर्काग्रास्वेष्टकर्णघ्नीमध्यकर्णोद्धृतास्वका २३ विषुवच्छायुताकाग्राया
म्येस्याद्उत्तरोभुजः विषुवत्यांविशोध्योदग्गोलेस्याद्बाहुकस्तरः २४ विपर्ययाद्भुजोयाम्योभवेत्प्रा
च्यापरांतरे माध्याह्निकोभुजोनित्यंछायामाध्याह्निकीभवेत् २५ सममंडलकर्णानयनम् ८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

इदं मलवं चेतिद्यथोरू मुपपन्नं=१ त्रि १२ क्रां·त्रिकं अत्तंभु·

इदं लवं चेति२

१२ त्रिक

क्रां·त्रिक	१२
लंको	
पल	

लंबाक्षजीवे विषुवच्छायाद्वादशसंगुले क्रांतिज्यामे तु तोकर्णैस्तिममंडलगे रवौ २६ पलांतरे समंडलकर्णनियनं सौम्यान्तोनायदाक्रांतिः स्यात्तदाद्युदलश्रवः विषुवच्छायया भ्यस्तः कर्णोमध्याग्रयोद्धृतः २७ पुनरर्काग्रासाधनं स्वक्रांतिज्या त्रिजीवाघ्नी लंबज्याप्ताऽग्रमौर्विका स्वेष्टकर्णहताभक्ता त्रिज्ययाग्रांगुलादिका २८ अथ अर्कज्यांगृहीत्वाकोणशंकुछायाकर्णसाधनं त्रिज्यावर्गार्द्धितोग्रज्यावर्गोना द्वादशाहतात् २९ पुनर्द्वादशनिघ्नाच्च लभ्यते यत्फलं बुधैः शंकुवर्गार्द्धे ७२ संयुक्त विषुवद्वर्गभाजितात् ३० लब्धं तु करणीनाम तां पृथक्स्थापयेद्बुधः अर्कघ्ना विषुवच्छायाग्रज्यागुणिता तथा ३१ भक्ताः फलाख्यं तद्वर्गसंयुक्त करणीयदा फलेन हीनसंयुक्तं दक्षिणोत्तरगोलयोः ३२ याम्ययोर्विदिशोः शंकुरेवं याम्योत्तरे रवौ परिभ्रमति शंकोस्तु शंकुरुत्तरयोस्तु सः ३३ तत्त्रिज्यावर्गविश्लेषान्मूलं दृग्ज्या विधीयते स्वशंकुनाविभज्याप्ते दृक्त्रिज्ये द्वादशाहते ३४ छायाकर्णौ तु कोणे तु यथास्वं देशकालयोः ३५ इष्टनाडीछायाकर्णसाधनं त्रिज्योदक्चरजायुक्ता याम्यायां तद्विवर्जिता अंत्या नतोत्क्रमज्योना स्वाहोरात्रार्द्धताडिता ३६ त्रिज्याभक्ताभवेच्छेदो लंबज्याघ्नोथ भाजितः त्रिभज्ययाभवेच्छंकुस्तद्वर्गं परिशोधयेत् ३७ त्रिज्यावर्गात्पदं दृग्ज्या छायाकर्णौ

उत्तरयोर्विदिशोः ईशानवायव्ययोः=५

हिसम्प्रतियुतेन पलभावर्गेण भक्तात्=७ आग्नेयीनैरृतीविदिशोः=५

अनुपातत्रयं

मकप	त्रि १२
त्रि·मग्र	१२
मछाक	पभा

अर्कदक्षिणोत्तरगोलयोः परिभ्रमतिमति=५ यदापरितोदिगंते च रवौ परिभ्रमति शंको रविकोणशंकोरवि शंकुरिष्टशंकुः साध्य इति अमीष्टशंकुप्रकारश्च कथित इति सौरभाष्यव्ये=५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तथा च तल्लः। यो मत्स्यपुच्छमुखविनिर्गतरज्जुयोगस्तस्मात्र्रभात्रितयचिह्नप्रिरोवगाहि। वृत्तं लिखेन्नविजहाति हि त
स्परेखां छायाकुलस्यिति मिवामलवं शजास्त्री॥२॥ =६

उक्तवत् ३८ अथ विलोमतस्तत्कालसाधनं अभीष्टछायया भ्यस्ता त्रिज्या तत्कर्णभाजिता ३९
दृग्ज्या तद्वर्गसंयुक्तात्त्रिज्यावर्गाद्वियत्पदं शंकुः स त्रिभजीवाघ्नः स्वलंबज्याविभाजितः ४० वृ
त्तस्त्रिभज्यया भ्यस्तः स्वाहोरात्रार्द्धभाजितः उन्नतज्या तया हीना स्वांत्यापोषस्य कार्मुकं ४१ उ
त्क्रमज्याभिरेवं स्युः प्राक्पश्चार्द्धेनतासवः अथ पक्षवादिमध्याह्नेवा ऽर्द्धाग्रातः छायार्कसाधनं
इष्टाग्राघ्ना स्वलंबज्या स्वकर्णांगुलभाजिता ४२ कोतिज्यासा त्रिजीवाघ्नी परमापक्रमोद्धृता
तच्चापं भादिकं देचे पदेस्तद्वत्स्यभास्करविः ४३ इष्टेह्निमध्ये प्राक्पश्चाद्धृत्ते वाहुत्र्यांतरे मत्स्यद्वयां
तरयुते स्निस्पृक्सूत्रेण भाभ्रमः ४४ त्रिभद्युकर्णार्द्धगुणाः स्वाहोरात्रार्द्धभाजिता ४५ स्वाभाद्ध
योरं ६ धर्गोगेगेकाः ७ ५५ पारत्र्यंकहिमांशवः १९२५ स्वदे कैर्मादेकैहि त्रिभज्यास्तच्चापानि प
पृथक् पृथक् स्वाधो धः प्रविशोध्याथ मेषाद्लंकोदयासवः ४६ स्वागाष्टयो ६७० धर्गोगेगेकाः ७५५
पारत्र्यंकहिमांशवः १९२५ स्वदेशचरखंडोना भवंतीष्टोदयासवः ४७ व्यस्ता व्यस्तैर्युताः स्वैः स्वैः क
र्कटाद्याः पुनस्त्रयः उत्क्रमेण षडेवैते भवंतीष्टास्तुलादयः ४८ अथ इष्टकालस्य लग्नसाधनं
गतभोग्यासवः साध्याभास्करादिष्टकालिकात् स्वोदयासुहता भुक्ता भोग्या भक्ताः खवह्निभिः

५
९

त्रिज्या·किं
ए दि त्रि राज्या क
मि द्यु को
त्रि·कं·
स्वस्वद्यु·इदं
=२

कार्या=१

४९ अभीष्टघटिकासुभ्यो भोग्यासून्प्रविशोधयेत् तद्वत्तदेष्यलग्नासूनेवं यातांस्तथोत्क्रमात् ५०
शेषं त्रिंशत्क्रमाभ्यस्तं मध्योदयभाजितं भागादिहीनयुक्तं स्यात्तल्लग्नं ~~स्वाम्भकेन ५१~~ क्षितिजे
तदा ५१ प्राक्पश्चान्नतनाडीभिस्तस्माल्लंकोदयासुभिः भानोःक्षयधने कृत्वा मध्यलग्नं तथा भवे
त् ५२ भोग्यासूनूनकस्याथ भुक्तासूनधिकस्य च संपिंड्यांतरलग्नासूनेवं स्यात्कालसाधनं ५३
सूर्याद्दूने निशाशेषे लग्नेऽर्काद्धिके दिवा भचक्रार्द्धयुताद्भानोरधिकेऽस्तमयात्परं ५४ इतिश्रीसू
र्यसिद्धांते त्रिप्रश्नाध्यायस्तृतीयः ३ सार्द्धानि षट्सहस्राणि ६५०० योजनानि विवस्वतः विष्कं
भो मंडलस्येंदोः सहाशीत्या चतुःशती ४८० १ स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ र
वेः स्वभगणाभ्यस्तः शशांकभगणोद्धृतः २ शशांककक्षागुणितो भाजितो वार्ककक्षया तो ५
४३२१५०० विष्कंभश्चंद्रकक्षायां तिथ्याप्ता मानलिप्तिकाः ३ स्फुटेंदुभुक्तिर्भूव्यासः १६०० गुणिता मध्य
योद्धृता ७९० २५ लब्धं सूची महीव्यासस्फुटार्कश्रवणांतरं ४ मध्येंदुव्यास ४८० गुणितं मध्यार्कव्या
स ६५०० भाजितं विशोध्य लब्धं सूच्यां तु तमोलिप्तास्तु पूर्ववत् ५ भानोर्भार्द्धे महीछाया तत्तुल्ये
ऽर्कसमेपि वा शशांकपाते ग्रहणं कियद्भागाधिके न के ६ तुल्यौ राश्यादिभिः स्यातामम[illegible]मावास्यां
अत्र ग्रासप्रमाणशब्दः कलावाची ज्ञेयः। भूव्यासस्य [illegible] सूर्यबिंबव्यासयोरंतरं मध्येन चंद्रबिंबव्यासेन = २
[illegible] = २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तत्कालिकौ सूर्येंदू पौर्णिमास्यंते भार्द्धभागादिभिः समौ ७ गतेष्यपर्वनाडीनां स्वफलेनोनसंयु
तौ समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा ८ छादको भास्करस्येंदुरधस्थो घनवद्भवेत्
१० असौ भूछाया छादको भवेत् भूछायां प्राङ्मुखश्चंद्रो विशत्यस्य भवेदसौ ९ तात्कालिकेंदुविक्षेपं छाद्यछादकमानयोः योगार्द्धा
त्प्रोह्य यच्छेषं तमश्छन्नं तदुच्यते १० ग्राह्यमानाधिके तस्मिन्सकलं न्यूनमन्यथा योगार्द्धादधिके न
स्याद्विक्षेपे ग्राससंभवः ११ ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक् विक्षेपवर्गहीनाभ्यां तद्वर्गा
भ्यां मुभे पदे १२ षष्ट्या संगुण्य सूर्येंदोर्भुक्त्यंतरविभाजिते स्यातां स्थितिविमर्दार्द्धनाडिकादिफले त
योः १३ स्थित्यर्द्धनाडिकाभ्यस्ता गतयः षष्टिभाजिताः लिप्तादिप्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः १४ त
द्विक्षेपैः स्थितिदलं विमर्दार्द्धं तथाऽसकृत् संसाध्यमन्यथापाते तल्लिप्तादिफलं स्वकं १५ स्फुटतिथ्यवसा
ने तु मध्यग्रहणमादिशेत् स्थित्यर्द्धनाडिकाहीने ग्रासो मोक्षस्तु संयुते १६ तद्वदेव विमर्दार्द्धनाडिका
हीनसंयुते निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे १७ अथेष्टग्रासः इष्टनाडीविहीनेन स्थित्य १०
र्द्धेनार्कचंद्रयोः भुक्त्यंतरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः १८ भानोर्ग्रहे कोटिलिप्ता मध्यस्थि
त्यर्द्धसंगुणाः स्फुटस्थित्यर्द्धसंभक्ताः स्फुटाः कोटिकलाः स्मृताः १९ क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रव
स्ततमानयोगार्द्धतः प्रोह्य ग्रासस्तात्कालिको भवेत् २० मध्यग्रहणतश्चाथ इष्टनाडीर्विशोधयेत्

10

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शेषं गलितं प्राग्वत् १ मौक्तिके ग्रासान्नयने = २
इष्टं स्यात् = ३
कार्मुकं बध्याःसं वलनांशाः = ४
तालिप्ताः षष्ठ्या संगुण्य भुक्त्यंतरभक्ता ना
ड्यः स्युः ताः स्वकीय स्पर्शस्थित्यर्धे च्छोध्याः
स्वेष्टग्रासघटिकाः स्युः = २

स्थित्यर्धान्मौक्तिकाच्छेषं प्राग्वच्छेषं तु मौक्तिके २१ अथेष्टग्रासात्कालज्ञानं ग्राह्यग्राहकयो
गार्धाच्छोध्याः स्वच्छन्नलिप्तिकाः तच्छर्गाच्छोध्यतत्कालविक्षेपस्य कृतिं पदं २२ कोटिलिप्ताः रवेः
स्पष्टस्थित्यर्धेनाहताहताः मध्येनालिप्तास्तन्नाड्यः स्थितिवद्ग्रासनाडिकाः २३ अथाक्षवलना
नयनं नतज्यान्तज्यया घ्नी तास्त्रिज्याप्तस्तस्य कार्मुकं वलनांशाः सौम्ययाम्याः पूर्वापरकपालयोः
२४ अथायनवलनं राशित्रययुताक्रान्[illegible]स्यात्क्रान्त्यंशैर्दिक्समैर्युताः भेदेन्तरे ज्या वलना सप्त
र्धः६ संख्यांगुलात्मिकाः २५ सोन्नतं दिनमध्यार्धं दिनार्धाप्तफलेन तु छिंद्याच्छेपमानानि तान्यस्यांमंगुला
नि तु २६ इति श्रीसूर्यसिद्धान्ते सोमसूर्यग्रहणाध्यायश्चतुर्थः ४ मध्यलग्नसमे भानौ हरिजस्य न
संभवः अक्षोदग्मध्यमक्रान्तिसाम्ये नावनतेरपि १ देशकालविशेषेण यथावनतिसंभवः लंव
नस्यापि पूर्वान्यदिग्वशाद्व तथोच्यते २ लग्नं प्रवेत्तिनाडीनां कुर्यात्स्वैरुदयासुभिः तज्ज्यां
लग्नाग्राजाता=२ त्यापक्रमज्याघ्नी लंवज्याप्तोदयाभिधा ३ तथा लंकोदयैर्लग्नं मध्यसंज्ञं यथोदितं तत्क्रां
त्यक्षांशसंयोगो दिक्साम्येन्तरमन्यथा ४ शेषं नतांशास्तन्मौर्वी मध्यज्यासाभिधीयते
मध्योदयज्यया भ्यस्ता त्रिज्याप्ता वर्गितं फलं ५ मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदं

क्रांत्यंशोः पूर्वा
नीतवलनं दि
क्साम्ये योगः
दिग्भेदेन्तरं का
र्यं तस्य क्रमज्या
वलनाज्यास्या
त् ७० भक्ता अंगु
लाद्या वलनां
शः क्रांत्यंशयो
र्योगेन्तरे वा
शिष्टस्य यादि
क् सा दिग्ज्ञेया =
५

क्षितिजे गुलस्यालिप्ता च यद्दष्टं मध्याह्ने तु लिप्ता च तदूर्ध्वं अतः सर्वमुपपन्नमिति सौरभाष्ये = १
भूधरः दिनमर्धार्धमिति तन्मतोक्षितिजे सार्धद्विकलं मध्याह्ने सार्धत्रिकलं बिंबमिति सिद्धं = १
अत्र मध्यलग्नशब्देन लग्नास्तलग्नयो[illegible]यल्लग्नं त्रिभोनार्धयुतं तदेव [illegible] दशमाख्यं लग्नाद्यम = ६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्पर्शमध्ययोर्मध्यमोक्षयोश्च भेदे कपालभेदे तत्कालिकलंबनयोर्योगः स्वस्वस्थितिदलयोज्यः। एवं स्पर्शस्थित्यर्द्धं मध्यस्थित्यर्द्धं च स्फुटं भवति। आभ्यां
चंद्रग्रहणोक्तदिशा मध्यग्रहणकालो लम्बनं ... स्पर्शमोक्षकालौ ... स्फुटे स्यातां ... स्पष्टे ॥

दृक्क्षेपः शीततिग्मांश्वोर्मध्यभुक्त्यंतराहतः। तिथिघ्नस्त्रिज्यया भक्तो लब्धं सावनतिर्भवेत् ॥१०॥ ६

तत्त्रिज्यावर्गविश्लेषान्मूलं शंकुः स दृग्गतिः ॥६॥ नतांशबाहुकोटिज्ये स्फुटे दृक्क्षेपदृग्गती ॥ एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया ॥७॥ मध्यलग्नार्कविश्लेषज्याछेदेन विभाजिता। रवीन्द्वोर्लंबनं ज्ञेयं प्राक्पश्चाद्घटिकादितत् ॥८॥ मध्यलग्नाधिके भानौ तिथ्यंतात्प्रविशोधयेत्। धनमूनेऽसकृत्कर्म यावत्सर्वं स्थिरी भवेत् ॥९॥ दृक्क्षेपात्सप्ततिहृताद्भवेद्वाऽवनतिः स्फुटा। अथवा त्रिज्यया भक्तात्सप्तसप्तक ४९ संगुणात् ॥१०॥ मध्यज्यादिग्वशात्सा च विज्ञेया दक्षिणोत्तरा। सेंदुविक्षेपदिक्साम्ये युक्ता विश्लेषितान्यथा ॥११॥ तया स्थितिविमर्द्दार्द्ध ग्रासाद्यं तु यथोदितं। प्रमाणवलनाभीष्टग्रासादि हिमरश्मिवत् ॥१२॥ स्थित्यर्द्धोनाधिकात्प्राग्वत्तिथ्यंताल्लंबनं पुनः। स्पर्शमोक्षोद्भवं साध्यं तन्मध्यहरिजांतरं ॥१४॥ प्राक्कपालेऽधिकं मध्याद्भवेत्प्राग्ग्रहणं यदि। मौक्षिकं लंबनं हीनं पश्चार्द्धे तु विपर्ययात् ॥१५॥ तदा मोक्षस्थितिदले देयं प्रग्रहणे तथा। हरिजांतरकं शोध्यं यत्रैतस्माद्विपर्ययात् ॥१६॥ एतदुक्तं कपालैक्ये तद्भेदे लंबनैकता। स्वस्वस्थितिदलेयोज्या विमर्दार्द्धेऽपि चोक्तवत् ॥७॥ इति श्रीसूर्यसिद्धांते सूर्यग्रहणाध्यायः पंचमः ॥५॥

त्रिभोनलग्नप्रदेशात्पूर्वतः प्रग्रहणे स्पार्शिकं लंबनं। मध्यान्मध्यलंबनादधिकं यदि यतः भवेत्। मौक्षिकं तु स्वल्पं यतो भवति। पश्चार्द्धे त्रिभोनलग्नात् पश्चिमतः विपर्ययात् वैपरीत्येन भवति। मध्यकालिकलंबनात् स्पर्शकालिकलंबनं न्यूनं मोक्षकालिकलंबनमधिकं। तत्रैतत् हरिजांतरं लंबनांतरं मोक्षस्थित्यर्द्धे मध्यमौक्षिकालिकलंबनयोरंतरं। स्पर्शस्थित्यर्द्धे मध्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

समभूमौ विंदुं कृत्वा तस्मात् ४९ अंगुलैर्वृत्तं । मानैक्यखंडांगुलैर्द्वितीयं । तत्समाससंज्ञं । ग्रासांगुलैस्तृतीयं =२

न छेद्यकमृते यस्माद्भेदा ग्रहणयोः स्फुटाः ज्ञायंते तत्प्रवक्ष्यामि छेद्यकज्ञानमुत्तमं १ सुसाधि
तायामवनौ विंदुं न्यस्य ततो लिखेत् सप्तवर्गांगुलेनादौ मंडलं वलनाश्रयं २ ग्रासग्राहकयो
गार्द्धसम्मिते तद्द्वितीयकं मंडलं तत्समासाख्यं ग्रासाद्यैस्तृतीयकं ३ याम्योत्तरप्राच्यपरासाधनं
पूर्ववद्दिशां प्रागिंदोर्ग्रहणं पश्चान्मोक्षोर्कस्य विपर्ययात् ४ यथादिशं प्रग्रहणं वलनं हिमदी
धितेः मौक्षिकं तु विपर्यस्तं विपरीतमिदं रवेः ५ वलनाग्रान्नयेन्मध्यसूत्रं तद्यत्र संस्पृशेत्
तत्समासे तु तौ देयौ विक्षेपौ ग्राससमोक्षिकौ ६ विक्षेपाग्रात्पुनः सूत्रं मध्यविंदुं प्रवेशयेत् तद्ग्राह
कवृत्तसंस्पर्शाद्ग्राससमोक्षौ विनिर्दिशेत् ७ नित्यशोर्कस्य विक्षेपाः परिलेख्य यथादिशं विपरीताः
वल=५ शशांकस्य तद्वशादथ मध्यमं ८ वलनं प्राङ्मुखं देयं तद्विक्षेपैकतायदि भेदे पश्चान्मुखं देयमिं
दोर्भानोर्विपर्ययात् ९ वलनाग्रात्पुनः सूत्रं मध्यविंदुं प्रवेशयेत् मध्यसूत्रेण विक्षेपं वलनाभिमु
खं नयेत् १० विक्षेपाग्राल्लिखेद्वृत्तं ग्राहकार्द्धेन तेन यत् ग्राह्यवृत्तं समाक्रांतं तद्ग्रस्तं तमसा भवेत्
११ छेद्यकं लिखता भूमौ फलके वा विपश्चिता विपर्ययो दिशां कार्यः पूर्वापरकपालयोः १२ स्वच्छत्वा
द्वादशांशोपि ग्रस्तश्चंद्रस्य दृश्यते लिप्तात्रयमपि ग्रस्तं तीक्ष्णत्वान्न विवस्वतः १२ स्वसंज्ञिता

छेद्यकं लिखता विपश्चिता पंडितेनेत्यर्थः =२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्त्रयः कार्या विक्षेपाग्रेषु बिंदवः तत्र प्राङ्मध्ययोर्मध्ये तथा मोक्षिकमध्ययोः १४ लिखेन्मत्स्यौ तयो
१२ र्मध्यान्मुखपुच्छविनिःसृतं प्रसार्य सूत्रद्वितयं तयोर्यत्र युतिर्भवेत् १५ तत्र सूत्रेण विलिखेच्चापं बिं
दुत्रयस्पृशा स पंथा ग्राहकस्योक्तो येनासौ संप्रयास्यति १६ ग्राह्यग्राहकयोगार्द्धात्प्रोह्य ग्रासमा
१४ गतं अवशिष्टांगुलसमां शलाकां मध्यबिंदुतः १७ तयोर्मार्गोन्मुखीं दद्याद्ग्रासतः प्रग्रहाश्रितां वि
मुंचतो मोक्षदिशि ग्राहकाध्वानमेव सा १८ स्पृशेद्यत्र ततो वृत्तं ग्राहकार्द्धेन संलिखेत् तेन ग्राह्यंय
दाक्रांतं तत्तमोग्रस्तमादिशेत् १९ मानांतरार्द्धेन मितां शलाकां ग्राससद्दिङ्मुखीं निमीलनाख्यां दद्या
त्तस्मात्तन्मार्गे यत्र संस्पृशेत् २० ततो ग्राहकखंडेन प्राग्वन्मंडलमालिखेत् तद्ग्राह्यमंडलयुतिर्य
त्र तत्र निमीलनं २१ एवमुन्मीलने मोक्षदिङ्मुखीं संप्रसारयेत् विलिख्य मंडलं प्राग्वदुन्मीलन इतवंशज्ञानमुत्त
मथोक्तवत् २२ ग्रासात्पूर्वे स धूम्रः स्यात्कृष्णः स्यादर्द्धाधिकं भवेत् विमुंचतः कृष्णताम्रं कपिलं सक मं =४
लग्रहे २३ रहस्यमेतद्देवानां न देयं यस्य कस्यचित् सुपरीक्षितशिष्याय देयं वत्सरवासिने २४ १२
इति श्रीसूर्यसिद्धांते परिलेखनाध्यायः षष्ठः ६ ताराग्रहाणामन्योन्यं स्यातां युद्धसमागमौ स
=नं२ मागमः शशांकेन सूर्येणास्तमयः सह १ शीघ्रे मंदेऽधिकेऽतीतः संयोगो भवितान्यथा द्वयोः प्रा वि=
ग्यायिनोरेवं वक्रिणोस्तु विपर्ययात् २ प्राग्यायिन्यधिकेऽतीतो वक्रिण्येष्यः समागमः ग्रहांत

यातएकोवक्री अन्योमार्गी। प्राग्यायिन्यधिकेऽतीतः। वक्रिण्येष्यधिके गम्य इति =२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यदा त्वेको वक्री अन्यो मार्गी वक्रगस्य विलोमं तदा एकं मार्गगस्य यथा कथित देयं समलिप्तौ स्यातां = ३

सोमे विक्षेपे = ६

मार्गगयोः वक्रगयोः

२ कलाः स्वस्वभुक्तिलिप्तासमाहताः ३ भुक्त्यंतरेण विभजेदनुलोमविलोमयोः द्वयोर्वक्रिणयोर्वै
कस्मिन् भुक्तियोगेन भाजयेत् ४ लब्धं लिप्तादिकं शोध्यं गते देयं भविष्यति विपर्ययाद्वक्रगयो
रेकस्मिंस्तु धनर्णयोः ५ समलिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ विवरं तद्भुक्त्या दिनादिफ
लमिष्यते ६ कृत्वा दिनक्षपामानं तथा विक्षेपलिप्तिकाः नतोन्नतं साधयित्वा स्वकाल्लग्न
वशात्तयोः ७ विषुवच्छायया भ्यस्ताद्विक्षेपाद्द्वादशोद्धृतात् फलं स्वनतनाडीघ्नं स्वदिनार्द्धवि
भाजितं ८ लब्धं प्राच्यामृणं सौम्याद्विक्षेपात्पश्चिमे धनं दक्षिणे प्राक्कपाले स्वं पश्चिमे तु
तथान्वयः ९ सत्रिभग्रहजक्रांतिभागघ्नाः क्षेपलिप्तिकाः विकलाः स्वमृणं क्रांतिक्षेपयो
र्भिन्नतुल्ययोः १० नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने शृंगोन्नतौ तु चंद्रस्य दृक्कर्म्मादा
विदं स्मृतं ११ तात्कालिकौ पुनः कार्यौ विक्षेपौ च तयोस्ततः दिक्तुल्ये त्वंतरं भेदे योगः शिष्टं ग्र
हांतरं १२ कुजार्किज्ञामरेज्यानां त्रिंशदर्द्धार्द्धवर्द्धिताः विष्कंभाश्चंद्रकक्षायां भृगोः षष्टिरुदाहृताः
१३ त्रिचतुःकर्णयुत्याप्तास्ते द्विघ्नास्त्रिज्यया हृताः स्फुटाः स्वकर्णास्तिथ्याप्ता भवेयुर्मानलिप्ति
काः १४ छायाभूमौ विपर्यस्ते स्वच्छायाग्रे तु दर्शयेत् ग्रहः स्वदर्पणान्तस्थः शंकोर्ग्रस्य प्रदर्श्यते

या १

इन· किं
श
प· भु·
उ· को
उदितान

त्रिंशतः अर्द्ध
ईनवर्द्धिता
मं ३०।००
श ३७।३०
बु ४५।०१
वृ ५२।३०
शु ६०।००

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१२ १५ पंचहस्तोछ्रितौ शंकू यथादिग्भ्रमणस्थितौ ग्रहांतरेण विन्यस्यावधोहस्तनिखातकौ १६
छायाकर्णौ ततो दद्याच्छायाग्राच्छंकुमूर्द्धगौ छायाकर्णाग्रसंयोगे संस्थितस्य प्रदर्शयेत्
13 १७ स्वशंकुमूर्द्धगौ व्योम्नि ग्रहौ दृक्तुल्यतामितौ उल्लेखस्तारकास्पर्शाद्भेदे भेदः प्रकीर्त्यते
१८ युद्धमंशुविमर्द्दाख्यमंशुयोगे परस्परं अंशादूनेपसव्याख्यं युद्धमेकोत्र चेदणुः १९ समा
गमोंशादधिके भवतश्चेद्बलान्वितौ अपसव्ये जितो युद्धे पिहितोणुरदीप्तिमान् २० रूक्षो वि
वर्णो विध्वस्तो विजितो दक्षिणाश्रितः उदकस्थो दीप्तिमान्स्थूलो जयी याम्योपि यो बली २१ आ
सन्नावप्युभौ दीप्तौ भवतश्चेत्समागमः स्वल्पौ द्वावपि विध्वस्तौ भवेतां कूटविग्रहौ २२ उ
दकस्थो दक्षिणस्थो वा भार्गवः प्रायशो बली शशांकेनैवमेतेषां कुर्यात्संयोगसाधनं २३ भावा
भावाय लोकानां कल्पनेयं प्रदर्शिता स्वमार्गगाः प्रयांत्येते दूरमन्योन्यमाश्रिताः २४ इति सू श्री ४ १२
र्यसिद्धांते समागमाध्यायः सप्तमः ७ प्रोच्यंते लिप्तिका भानां स्वभोगोथ दशाहताः भवंत्यती
तधिष्ण्यानां भोगलिप्तायुता ध्रुवाः १ अष्टौर्णवाः ४८ शून्यकृताः ४० पंचषष्टि ६५ र्नगेष
वः ५७ अष्टार्था ५८ गोब्धयो ४९ ष्टागा ७८ रसागा ७६ मनवस्तथा १४ २ कृतेषवो ५४ युगरसाः ६४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्य वारुणे ५० वियद्रसाः ६० खवेदाः ४० सागरनगाः ७४ अष्टागाः ७८ सागरर्त्तवः ६४ ३ मनवो १४
थ रसा ६ वेदाः ४ वैश्वमाप्यार्द्ध भोगगं आप्यस्यैवाभिजित्प्रांते वैश्वांते श्रवणस्थितिः ४ त्रिचतुष्पाद
योः संधौ श्रविष्ठाश्रवणस्य च स्वभोगतो वियन्नागाः ८० षट्कृतिः ३६ यमलाश्विनः २२ ५ रंध्राद्रयः
७९ क्रमादेषां विक्षेपाः स्वादपक्रमात् दिग् १० मासा १२ विषयाः ५ सौम्ये याम्ये पंच ५ दिशो १० नव ९ ६
सौम्ये रसाः ६ खं ० याम्ये गाः ७ सौम्ये खार्काः १२ त्रयोदश १३ २ दक्षिणे रुद्रा ११ यमले २ सप्तत्रिंशत् ३७ दक्षोत्तरे

अ	भ	कृ	रो	मृ	आ	पु	पु	ऽश्ले	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू	उ	अ	श्र	ध	श	पू	उ	रे
०	०	१	१	२	२	३	३	३	४	४	५	५	६	६	७	७	७	८	८	८	८	९	९	१०	१०	११	११
८	२०	७	१९	३	२४	३	१६	१९	९	२४	५	२०	०	१९	३	१४	१९	१	१४	२०	२६	१०	२०	२०	२६	७	२९
०	०	२०	३०	०	५०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	०	४०	०	०	०	०	०	५०
१०	१२	५	५	१०	९	६	०	७	०	१२	१३	११	२	३७	१।३०	२	४	९	५।३०	५	६०	३०	३६	०।३०	२४	२६	०
उ	उ	उ	द	द	द	उ	०	द	०	उ	उ	द	द	उ	द	द	द	द	द	द	उ	उ	उ	द	उ	उ	उ

७ याम्ये ध्यर्द्ध १।३० विकर्ण कृता ४ नवसार्द्ध शरे ५।३० षष्ठः ५ उत्तरस्यां तथा षष्टिः ६० त्रिंशत् ३० षट्त्रिंश
३६ देवहि ८ दक्षिणे त्वर्द्ध ०।३० भागास्तु चतुर्विंशतिरुत्तरे भागाः षड्विंशतिः २६ खं च ० दस्रा
दीनां यथाक्रमात् ९ अशीति ८० भागे याम्यायामगस्त्यो मिथुनांतगः विंशे तु २० मिथुनस्यांशे म

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गव्याधोप्यवास्थितः १७ विक्षिप्ताद्दक्षिणेभागैः खात्रिविंः स्वाब्दपक्रमात् हुतभुग्ब्रह्महृदयौ वृ-

षे द्वाविंश२२भागगौ १८ अष्टाभिः८ स्त्रिंशता३० चैव विक्षिप्तावुत्तरेण तौ गोलं बद्ध्वा परीक्षेत

१४

अग.	मग.	हुत	ब्रह्म.
२ ० ०	२ २० ०	१ २२ ०	१ २२ ०
८० द.	५. द.	८ उ.	३० उ.

विक्षेपं ध्रुवकं स्फुटं १९ वृषे सप्तदशे१७ भागे यस्य याम्योंऽशकद्वयात्

विक्षेपोऽभ्यधिको भिंद्याद्रोहिण्याः शकटं तु सः २१ ग्रहवद्युनिशे

भानां कुर्याद्दृक्कर्म पूर्ववत् ग्रहमेलकवच्छेषं ग्रहभुक्त्या दिनादिकं २४

एष्यो हीने ग्रहे योगो ध्रुवकादधिके गतः विपर्ययाद्वक्रगते ग्रहे

ज्ञेयः समागमः २५ फाल्गुन्योर्भाद्रपदयोस्तथैवाषाढयोर्द्वयोः विशाखाश्विनिसौम्यानां यो-

गतारोत्तरा स्मृता २६ पश्चिमोत्तरताराया द्वितीया पश्चिमे स्थिता हस्तस्य योगतारा सा श्र-

विष्ठायाश्च पश्चिमा २७ ज्येष्ठाश्रवणमैत्राणां बार्हस्पत्यस्य मध्यमा भरण्याग्नेयपित्र्याणां रे-

वत्याश्चैव दक्षिणा २८ रोहिण्यादित्यमूलानां प्राची सार्पस्य चैव हि यथाप्र- १४

त्यवशेषाणां स्थूला स्याद्योगतारका २९ पूर्वस्यां ब्रह्महृदयादंशकैः पंच-

भिस्ततः प्रजापतिर्वृषान्ते सौम्येऽष्टत्रिंशदंशकैः ३० अपांवत्सस्तु चित्राया

या उत्तरेंऽशैस्तु पंचभिः बृहत्किंचित्ततो भागैरापः षड्भिस्तथोत्तरे ३१

प्र.	अपां.	आप.	
१ २० ०	६ ० ०	६ ० ०	
उ. ३८	उ. ५	उ. ६	

आदित्यसौम्यमध्यार्द्धवियद्गासमाश्रिता पाठांतरं =३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

इति श्रीसूर्यसिद्धांते नक्षत्रध्रुवविवृत्ते ग्रहयोगाध्यायोऽष्टमः ८ अथोदयास्तमय
योः परिज्ञानं प्रकीर्त्तितं दिवाकरकराक्रांतमूर्त्तीनामल्पतेजसां १ सूर्यादभ्यधिकाः प
श्चादस्तं जीवकुजार्कजाः ऊनाः प्रागुदयं यांति शुक्रज्ञौ वक्रिणौ तथा २ ऊना विवस्वतः प्रा
च्यामस्तं चंद्रज्ञभार्गवाः व्रजंत्यभ्यधिकाः पश्चादुदयं शीघ्रयायिनः ३ सूर्यास्तकालिकौ
पश्चात्प्राच्यामुदयकालिकौ दिवाकरग्रहौ कुर्याद्दृक्कर्माथ ग्रहस्य तु ४ ततो लग्नांतर प्राणाः
कालांशाः षष्टिभाजिताः प्रतीच्यां षड्भयुतयोस्तद्वल्लग्नांतरासवः ५ एकादशामरे
ज्यस्य तिथिसंख्यार्कजस्य च अस्तांशा भूमिपुत्रस्य दश सप्ताधिकास्तथा ६ पश्चादस्तमयो
ष्टाभिरुदयः प्राङ्महत्तया प्रागस्तमुदयः पश्चादल्पत्वाद्दशभिर्भृगोः ७ एवं बुधो द्वादश
भिश्चतुर्दशभिरंशकैः वक्री शीघ्रगतिश्चार्कात्करोत्यस्तमयोदयौ ८ एभ्योऽधिकैः काल
भागैर्दृश्या न्यूनैरदर्शनाः भवंति लोके खचरा भानुभाग्रस्तमूर्त्तयः ९ तत्कालांशांतरकला
भुक्त्यंतरविभाजिताः दिनादि तत्फलं लब्धं भुक्तियोगेन वक्रिते १० तल्लग्नासुहते भुक्ती अ
ष्टादशशतोद्धृते स्यातां कालगती ताभ्यां दिनादिगतगम्ययोः ११ हस्तश्रवणफाल्गुन्यो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

=हस्तश्रवणपाढात्रयं श्लोकः प्रथमः =१

धनिष्ठारोहिणीमघाः चतुर्दशांशकैर्दृश्याविशाखाश्विनिदैवतं १२ स्वात्यगस्त्यमृगव्या
१५ धचित्राज्येष्ठापुनर्वसुः अभिजिद्ब्रह्महृदयं त्रयोदशभिरंशकैः १३ कृत्तिकामूलमैत्रा
णिसार्पं रौद्रर्क्षमेव च दृश्यंते पंचदशभिराषाढाद्वितयं तथा १४ भरणीतिष्यसौम्या
15 नि सौक्ष्म्यात्त्रिःसप्तकांशकैः शेषाणि सप्तदशभिर्दृश्यादृश्यानि भानि तु १५ अष्टादश
शता १८०० भ्यस्ताद्दृश्यांशाः स्वोदयासुभिः विभज्य लब्धाः क्षेत्रांशास्तैर्दृश्यादृश्यता
थवा १६ प्रागेषामुदयः पश्चादस्तो दृक्कर्म पूर्ववत् गतैष्यदिवसप्राप्तिर्भानुभुक्त्यास
दैव हि १७ अभिजिद्ब्रह्महृदयं स्वातीवैष्णववासवाः आहिर्बुध्न्यमुदक्स्थत्वान्नलुप्यं
तेऽर्करश्मिभिः १९ इतिश्रीसूर्यसिद्धांते ग्रहनक्षत्रोदयास्तमयो नाम नवमोध्यायः
९ उदयास्तविधिः प्राग्वत्कर्तव्यः शीतगोरपि भागैर्द्वादशभिः पश्चाद्दृश्यः प्राग्यात्यदृ
श्यतां १ रवींद्वोः षड्भयुतयोः प्राग्वल्लग्नांतरासवः तैःकालांशो रवींद्वोश्च कार्या विवर १५
नाडिकाः २ तन्नाडिकाहते भुक्ती रवींद्वोः षष्टिभाजिते तत्फलान्वितयोर्भूयः कर्त्त
व्या विवरासवः ३ एवं यावत्स्थिरीभूता रवींद्वोर्विवरासवः तैः प्राणैरस्तमेतींदुः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दर्शप्रतिपादिताज्या =३

भुक्तेः कालोऽस्तमयात्परं ४ भगणार्द्धं रवौ दत्वा कर्त्तव्या विवरासवः तैः प्राणैः कृष्णपक्षे तु शीतांशु
रुदयं व्रजेत् ५ अथ शृंगोन्नतिसाधनं अर्केंद्वोः क्रांतिविश्लेषो दिक्साम्ये युतिरन्यथा त
ज्ज्येंदुरर्कदिग्घ्वासौ विज्ञेया दक्षिणोत्तरा ६ मध्याह्नेंदुप्रभाकर्णसंगुणा यदि सोत्तरा तदाऽर्की
घ्नाऽक्षजीवायां शोध्या योज्या तु दक्षिणा ७ शेषं लंवज्यया भक्तं लब्धो वाहुः स्वदिङ्मुखः को
टिः शंकुस्तयोर्वर्गयुतेर्मूलं श्रुतिर्भवेत् ८ सूर्योनशीतगोर्लिप्ताः शुक्लं नवशतोद्धृताः
चंद्रविंवांगुलाभ्यस्तं हृतं द्वादशभिः स्फुटं ९ दत्वार्कसंज्ञितं विंदुं ततो वाहुं स्वदिङ्मुखं ततः प
श्चान्मुखं कोटिं कर्णं कोट्यग्रमध्यगं १० कोटिकर्णयुताद्विंदोर्विंवं तात्कालिकं लिखेत् क
र्णसूत्रेण दिक्सिद्धिं प्रथमं परिकल्पयेत् ११ शुक्लं कर्णेन तद्विंवयोगादंतर्मुखं नयेत् शु
क्लाग्रयाम्योत्तरयोर्मध्ये मत्स्यौ प्रसाधयेत् १२ तन्मध्यसूत्रसंयोगाद्विंदुं त्रिस्पृग्लिखेद्धनुः
प्राग्विंवं यादृगेव स्यात्तादृक्तत्र दिने शशी १३ कोट्या दिक्साधनात्तिर्यक्सूत्रांते शृंगमु
न्नतं दर्शयेदुन्नतां कोटिं कृत्वा चंद्रस्य साकृतिः १४ कृष्णे षड्भयुतं सूर्यं विशोध्येंदोस्तथा
सितं दद्याद्वामं भुजं तत्र पश्चिमं मंडलं विधोः १५ इति श्रीसूर्यसिद्धांते शृंगोन्नत्यध्यायो दशमः

अर्कगुणास्तु
याम्योत्तरयो
द्वयोरेवग्रह
ज्यकायांशो
धनयोजने
भेदः =३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मः १० एकायनगतौ स्यातां सूर्याचंद्रमसौ यदा तद्युतौ मंडले क्रांत्योस्तुल्यत्वे वैधृता
१६ भिधः १ विपरीतायनगतौ चंद्रार्कौ क्रांतिलिप्तिकाः समास्तदा व्यतीपातो भगणार्द्धे त
योर्युतौ २ तुल्यांशुजालसंपर्कात्तयोस्तु प्रवहाहतः तद्दृक्क्रोधोद्भवो वह्निर्लोकाभावा
16 य जायते ३ विनाशयति पातोऽस्मिन्लोकानामसकृद्यतः व्यतीपातः प्रसिद्धोऽयं संज्ञा
भेदेन वैधृतिः ४ स कृष्णो दारुणवपुर्लोहिताक्षो महोदरः सर्वानिष्टकरो रौद्रो भूयो
भूयः प्रजायते ५ भास्करेंद्वोर्भचक्रांतश्चक्रार्द्धावधिसंस्थयोः दृक्तुल्यसाधितांशादि
युक्तयोः स्वावपक्रमौ ६ अथौजपदगस्येंदोः क्रांतिर्विक्षेपसंस्कृता यदि स्यादधिका
भानोः क्रांतेः पातो गतस्तदा ७ ऊना चेत्स्यात्ततो भावी वामं युग्मपदस्य च पदान्यत्वं वि
धोः क्रांतिर्विक्षेपाद्यदि शुध्यति ८ क्रांत्योर्ज्ये त्रिज्ययाभ्यस्ते परक्रांतिज्ययोद्धृते त १६
च्चापांतरमर्द्धं वा योज्यं भाविनि शीतगौ ९ शोध्यं चंद्राद्गते पाते तत्सूर्यगतिताडितं चंद्र
भुक्त्या हृतं भानौ लिप्तादि शशिवत्फलं १० तद्वच्छशांकपातस्य देयं हेयं विपर्ययात् कर्मै
तदसकृत्तावद्यावत्क्रांती समे तयोः ११ क्रांत्योः समत्वे पातोऽथ प्रक्षिप्तांशोनिते विधौ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऊनेर्द्धरात्रिकाद्यातोभावीतात्कालिकेधिके १२ स्थिरीकृतार्द्धरात्रेंद्वोर्द्वयोर्विवरलिप्तिकाः
षष्ठिघ्नाश्चंद्रभुक्त्याप्ताः पातकालस्यनाडिकाः १३ रवींदुमानयोगार्द्धंषष्ठ्यासंगुण्य
भाजयेत् तयोर्भुक्त्यंतरेणाप्तंस्थित्यर्द्धंनाडिकादितत् १४ पातकालस्फुटोमध्यः सो
पिस्थित्यर्द्धवर्जितः तस्यसंभवकालःस्यात्तत्संयुक्तोंत्यसंज्ञकः १५ आद्यंतकाल
योर्मध्यःकालोज्ञेयोऽतिदारुणः प्रज्वलज्ज्वलनाकारःसर्वकर्मसुगर्हितः १६
एकायनगतंयावदर्केंद्वोर्मंडलांतरं संभवस्तावदेवास्यसर्वकर्मविनाशकृत् १७
स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः प्राप्यतेसुमहच्छ्रेयस्तत्कालज्ञानतस्त
था १८ रवींद्वोस्तुल्यताक्रांत्योर्विषुवत्सन्निधौयदा द्विर्भवेत्तर्हितदापातःस्यादभावो
विपर्ययात् १९ शशांकार्कयुतेर्लिप्ताभभोगेनविभाजिताः लब्धंसप्तदशांतोन्योव्यती
पातस्तृतीयकः २० सार्पैंद्रपौष्णधिष्ण्यानामंत्याःपादाभसंधयः तदग्रभेष्वाद्यपा
दोगंडांतमितिकीर्त्यते २१ व्यतीपातत्रयंघोरंगंडांतत्रितयंतथा एतद्भसंधित्रितयंसर्व

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कर्म्मसु वर्जयेत् २२ इत्येतत्परमंपुण्यंज्योतिषांचरितंमहत् रहस्तमसाख्यातंकि
मन्यच्छ्रोतुमिच्छसि २३ इतिश्रीसूर्यसिद्धांतेव्यतीपातानयनंनाम एकादशोध्यायः ११
७ 17 अथार्कांशसमुद्भूतंप्रणिपत्यकृतांजलिः भक्त्यापरमयाभ्यर्च्यपप्रच्छेदंमयासुरः १
भगवन्किंप्रमाणाभूः किमाकाराकिमाश्रया किंविभागाकथंचात्रसप्तपातालभूमयः
२ अहोरात्रव्यवस्थांचविदधातिकथंरविः कथंपर्येतिवसुधांभुवनानिविभासयन्
३ सुरासुराणामन्योन्यमहोरात्रंविपर्ययात् किमर्थंतत्कथंवास्याद्भानोर्भगणपूरणा
त् ४ पित्र्यंमासेनभवतिनाडिषष्ट्यातुमानुषं तदेवकिलसर्वत्रनभवेत्केनहेतुना
५ दिनाब्दमासहोराणामधिपानसमाः कुतः कथंपर्येतिभगणः सग्रहोयंकिमाश्रयः
६ भूमेरुपर्युपर्यूर्ध्वाः किमुत्सेधाः किमंतराः ग्रहकक्षाः किमात्राः स्थिताः केनक्र ७
मेणताः ७ ग्रीष्मेतीव्रकराभानोर्नहेमंतेतथाविधाः कियतीतत्करव्याप्तिर्मानानिकति
किंचतैः ८ एतन्मेसंशयंछिंधिभगवन्भूतभावन अन्योनत्वामृतेछेत्ताविद्यतेसर्वद

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

= यजुर्वेदोपनिषदि। तस्य यजुरेव शिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्षः आदेश आत्मा अथर्वांगिरसः पुच्छं प्रतिष्ठा यतो वाचो निवर्तंते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वान्न बिभेति कदाचनेति = ८

शिवान् ९ इति भक्त्योदितं श्रुत्वा मयेनेदं सप्रकृषः रहस्यं परमध्यायं ततः प्राह पुनः स तं १०
सूर्य उवाच शृणुष्वैकमना भूत्वा गुह्यमध्यात्मसंज्ञितं प्रवक्ष्याम्यतिभक्तानां नाऽदेयं वि
द्यते मम ११ वासुदेवः परं ब्रह्म तन्मूर्तिः पुरुषः परः अव्यक्तो निर्गुणः शांतः पंचविंशात्प
रोव्ययः १२ प्रकृतिस्थं गतो देवो वोध्यमानस्तु सर्वगः संकर्षणोऽपरः सूक्ष्मादो तासु वी
र्यमवासृजत् १३ तदंडमभवद्धैमं सर्वमं तस्तमोवृतं तत्रानिरुद्धः प्रथमं व्यक्तीभूतः स
नातनः १४ हिरण्यगर्भो भगवानेष छंदसि पठ्यते आदित्यो ह्यादिभूतत्वात्प्रसूत्या सू
र्य उच्यते १५ परं ज्योतिस्तमः पारे सूर्योयं सवितेति च पर्येति भुवनान्येष भगवान्भूत
भावनः १६ प्रकाशात्मा तमोहंता महानित्येषविश्रुतः ऋचोस्य मंडलं सामान्युस्त्रा मू
र्तिर्यजूंषि च १७ त्रयीमयोयं भगवान्कालात्मा कालवित्प्रभुः सर्वात्मा सर्वगः सूक्ष्मः
सर्वमस्मिन्प्रतिष्ठितं १८ रथे विश्वमये चक्रे कृत्वा संवत्सरात्मकं छंदांस्यश्वांस्तत्र यु
क्त्वा पर्येत्येष वशी सदा १९ त्रिपादममृतं गुह्यं पादोयं प्रकटोभवत् सोहंकारं जगत्सृ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ष्टे ब्रह्माणमसृजत्स्वयम्भुः २० तस्मै वेदान्वरान्दत्वा सर्वलोकपितामहं प्रतिष्ठाप्यांडमध्य
स्थः स्वयं पर्य्येति भासयन् २१ अथ सृष्टौ मनश्चक्रे ब्रह्माहंकारमूर्त्तिभृत् मनसश्चंद्रमा
१८ जज्ञे सूर्योऽक्ष्णोस्तेजसांनिधिः २२ मनसः खं ततो वायुरग्निरापो धरा क्रमात् गुणैकवृद्ध्या
18 पंचैवं महाभूतानि जज्ञिरे २३ अग्नीषोमौ भानुचंद्रौ ततस्त्वंगारकादयः तेजोभूखांबुवातेभ्यः
क्रमशः पंच जज्ञिरे २४ पुनर्द्वादशधात्मानं विभजे द्राशिसंज्ञितं नक्षत्ररूपिणं भूयः सप्तविंशा
त्मकं वशी २५ ततश्चराचरं विश्वं निर्ममे लं देवपूर्वकं ऊर्द्धमध्याधरेभ्योऽस्य स्रोतोभ्यः प्रकृतिं सृ
जत् २६ गुणकर्मविपाकेन सृष्ट्वा प्राग्वाहदनुक्रमात् विभागं कल्पयामास यथास्वं वेददर्शना
त् २७ ग्रहनक्षत्रताराणां भूमेर्विश्वस्य प्रभुः देवासुरमनुष्याणां सिद्धानां च यथाक्रमं २८ ब्रह्मां
डमेतत्सुषिरं यत्रेदं भूर्भुवादिकं कटाहद्वितयस्येव संपुटं गोलकाकृतिः २९ ब्रह्मांडमध्ये
परिधिर्व्योमकक्षाऽभिधीयते तन्मध्ये भ्रमणं भानामधोऽधः क्रमादथ ३० मंदामरेज्यभूपुत्रसू १८
र्य्यशुक्रेंदुजेंदवः परिभ्रमंत्यधोधःस्थाः सिद्धा विद्याधरा घनाः ३१ मध्ये समंतादण्डस्य भूगोलो व्यो
म्नि तिष्ठति बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकां ३२ तदंतरपुटाः सप्त नागासुरसमाश्रयाः
अतलं१ वितलं२ सुतलं३ तलातलं४ महातलं५ रसातलं६ पातालं७ इति भागवते =१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दिव्यौषधिरसोपेता रम्याः पातालभूमयः ३३ अनेकरत्ननिचयो जांबूनदमयो गिरिः भूगो
लमध्यगो मेरुरुभयत्र विनिर्गतः ३४ उपरिष्टात्स्थितास्तस्य सेंद्रा देवा महर्षयः अधःस्था
दसुरास्तद्वद्द्विषंतोन्योन्यमाश्रिताः ३५ ततः समंतात्परिधिः क्रमेणायं महार्णवः मेखलेव
स्थितो धात्र्या देवासुरविभागकृत ३६ समंतान्मेरुमध्यात्तु तुल्यभागेषु वारिधेः द्वीपेषु दि
क्षु पूर्वादिनगर्यो देवनिर्मिताः ३७ भूवृत्तपादे पूर्वस्यां यमकोटीति विश्रुता भद्राश्ववर्षे नगरी स्व
र्णप्राकारतोरणा ३८ याम्यायां भारते वर्षे लंका तद्वन्महापुरी पश्चिमे केतुमालाख्ये रोमकाख्या
प्रकीर्त्तिता ३९ उदक्सिद्धपुरी नाम कुरुवर्षे प्रकीर्त्तिता तस्यां सिद्धा महात्मानो निवसंति गतव्य
थाः ४० भूवृत्तपादविवरा ताश्चान्योन्यं प्रतिष्ठिताः ताभ्यश्चोत्तरतो मेरुस्तावानेव सुराश्रयः ४१
तासामुपरिगो याति विषुवत्स्थो दिवाकरः न तासु विषुवच्छाया नाक्षस्योन्नतिरिष्यते ४२ मे
रोरुभयतो मध्ये ध्रुवतारे व्यवस्थिते निरक्षदेशसंस्थानामुभये क्षितिजाश्रिते ४३ अतो नाक्षो
च्छ्रयस्तासु ध्रुवयोः क्षितिजस्थयोः नवतिर्लंबकांशास्तु मेरावक्षांशकास्तथा ४४ मेषादौ देवभा
गस्थे देवानां याति दर्शनं असुराणां तुलादौ तु सूर्यस्तद्भागसंचरः ४५ अत्यासन्नतया ते नग

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अतीव्राः करा रवेः देवभागे सुराणां तु हेमंते मंदतान्यथा ४६ देवासुरा विषुवति क्षितिजस्थं दि
वाकरं पश्यंत्यन्योन्यमेते षां वामसव्ये दिनक्षपे ४७ मेषादावुदितः सूर्यस्त्रीन् राशीनुदगुत्तरं
१५ संचरन्प्रागहर्मध्यं पूरयेन्मेरुवासिनां ४८ कर्कादीन् संचरंस्तद्वदहः पश्चार्धमेव सः तुला
15 दींस्त्रीन्मृगादींश्च तद्वदेव सुरद्विषां ४९ अतो दिनक्षपे तेषामन्योन्यं हि विपर्ययात् अहोरात्र
प्रमाणं च भानोर्भगणपूरणात् ५० दिनक्षपार्धमेतेषामयनांते विपर्ययात् उपर्यात्मानम
न्योन्यं कल्पयंति सुरासुराः ५१ अन्येपि समसूत्रस्थामन्यंतेधः परस्परं भद्राश्वकेतुमाल
स्था लंकासिद्धपुराश्रिताः ५२ सर्वत्रैवं महीगोले स्वस्थानमुपरिस्थितं मन्यंते खे यतो
गोलस्तस्य क्वोर्ध्वं क्व वाप्यधः ५३ अल्पकायतया लोकाः स्वस्थानात्सर्वतोदशं पश्यंति
वृत्तामप्येनां चक्राकारां वसुंधरां ५४ सव्यं भ्रमति देवानामपसव्यं सुरद्विषां उपरिष्टाद् १५
भगोलोयं व्यक्षे पश्चान्मुखः सदा ५५ एवमत्र दिनं त्रिंशन्नाडीकं शर्वरी तथा हानिवृद्धी सदा वा
मं देवासुरविभागयोः ५६ मेषादौ प्रत्यहं वृद्धिरुदगुत्तरतो दिवा देवभागे क्षपा हानिर्विपरीतं तथा
सुरे ५७ तुलादौ द्युनिशं वामं क्षयवृद्धी तयोरुभे देशक्रांतिवशान्नित्यं तद्विज्ञानं पुरोदितं ५८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५.५९
भूवृत्तं क्रांतिभागघ्नं भगणांश ३६० विभाजितं अवाप्तयोजनैरर्को व्यासाद्यात्युपरिस्थितः ५९
परमापक्रमादेवं योजनानि विशोधयेत् भूवृत्तपादाच्छेषाणि यानि स्युर्योजनानि तैः ६० अ
यनांते विलोमेन देवासुरविभागयोः नाडीषष्ट्या सकृदहो निशाप्यस्मिन्सकृत्तथा ६१ तदं
तरेपि षष्ठ्यं ते क्षयवृद्धी अहर्निशोः परतो विपरीतोयं भगोलः परिवर्त्तते ६२ ऊने भूवृत्तपा
दे तु द्विज्यापक्रमयोजनैः धनुर्मृगस्थः सविता देवभागे न दृश्यते ६३ तथा चासुरभागेपि मि
थुने कर्कटे स्थितः नष्टच्छायं महीवृत्तपादे दर्शनमादिशेत् ६४ एकज्यापक्रमानीतैर्योजनैः
परिवर्जितैः भूमिकक्षाचतुर्थांशैर्व्यक्ताश्शेषैस्तु योजनैः ६५ धनुर्मृगालिकुंभेषु संस्थितो
र्को न दृश्यते देवभागेऽसुराणां तु वृषाद्ये भचतुष्टये ६६ मेरोर्मेषादिचक्रार्द्धे देवाः पश्यंति भास्क
रं सकृदेवोदितं तद्वदसुराश्च तुलादिगं ६७ इंदोर्मंडलतश्चोर्द्धस्थितास्ते पितरो रविः उदितं ह
स पक्षार्द्धे पश्यंत्यस्तं सितार्द्धके ६८ भूमंडलात्पंचदशे भागे देवे तथासुरे उपरिष्टाद्व्रजत्यर्कः सौ
म्ययाम्यायनांतगः ६९ तदंतरालयोश्छाया याम्योदक्संभवत्यपि मेरोरभिमुखं याति पर
तः स्वविभागयोः ७० भद्राश्वोपरिगः कुर्याद्भारते तूदयं रविः रात्र्यर्द्धं केतुमाले च कुरुष

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्तमयं तथा ७१ भास्करादिध्रुवर्क्षेषु तद्देवपरिभ्रमन्त मध्योदयाईगात्रास्तकालान्कुर्यात्स्व
दृत्तिलं ७२ ध्रुवोन्नतिर्भचक्रस्य नतिर्मेरौ प्रयास्यतः निरक्षाभिमुखं यातुर्विपरीते नतोन्न
२० ती ७३ [redacted] भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः पर्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्र
20 मं ७४ उपरिस्थस्य महती कक्षाल्पाधःस्थितस्य च महत्या कक्षया भागा महान्तोल्पास्तथाल्प
या ७५ कालेनाल्पेन भगणं भुङ्क्तेऽल्पभ्रमणाश्रितः ग्रहः कालेन महता मंडले महति भ्रम
न् ७६ अल्पयातो बहून्भुङ्क्ते भगणान्शीतदीधितिः महत्या कक्षया गच्छंस्ततः स्वल्पा
न् शनैश्चरः ७७ नभश्चराणां विवरं स्वल्पं महदधोपरि तद्वदेषां क्रमादूर्ध्वमुच्चभ्रमणम
र्त्तिना ७८ मंदादधः क्रमेण स्युश्चतुर्था दिवसाधिपाः वर्षाधिपतयस्तद्वत्तृतीयाः परिकी
र्त्तिताः ७९ ऊर्ध्वक्रमेण शशिनो मासानामधिपाः स्मृताः होरेशाः सूर्यतनयादधोधः प २०
रिकीर्त्तिताः ८० भवेद्भकक्षा तिग्मांशोर्भ्रमणं षष्टिताडितं सर्वोपरिस्थं भ्रमति योजनैस्तै
र्भमंडलं ८१ कल्पोक्तचन्द्रभगणा गुणिताश्चन्द्रकक्षया आकाशकक्षा विज्ञेया करव्याप्ति
स्तथा रवेः ८२ सैव यत्कल्पभगणैर्भक्ता तद्भ्रमणं भवेत् कुवासरैर्विभज्याह्नः सर्वेषां प्रा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१२५८५८१५३ ३२४०००

गतिः स्मृता ८३ भुक्तियोजनसंख्यांशेः सेव भमण्डलसंगुणा स्वकक्षाप्ता तु सा तस्य तिथ्या

प्ता गतिलिप्तिका: ८४ कक्षाभकक्षागुणिता महीमंडलभाजिता तत्कक्षाभमिकक्षाखेनो ग्रहो

स्वै स्वंदली कृतः ८५ खत्रयाब्धिद्विदहनाः ३२४००० कक्षा तु हिमदीधितेः ज्ञशीघ्रस्यांकख

द्वित्रिकृतभून्येंदवः १०४३२०९ स्तथा ८६ शुक्रशीघ्रस्य सप्ताग्निरसाब्धिरसषड्यमाः २६६४६३७

ततोर्कबुधशुक्राणां खखखार्थैकसुरार्णवाः ४३३१५०० ८७ कुजस्याप्यंकभून्यांकषड्वेदैक

भुजंगमाः ८१४६९०४ चंद्रोच्चस्य कृताष्टाब्धिवसुद्विन्यष्टवह्नयः ३८३२८४८४ ८८ कृतर्तु

मुनिपंचाद्रिगुणेंदुविषयाः ५१३७५७६४ गुरोः खभानोरससप्ताब्धिद्विपोलार्थखकुंजराः

८०५७२८७६ ८९ पंचबाणाक्षिनागर्तुरसाद्यर्काः १२७६६८२५५ शनेरतः भानां रविख

भून्यांकवसुरंध्रशशाब्धिरनः २५९८९००१२४९० । खव्योमखखचयखसागरषट्कनागव्योमा

ष्टभून्ययमरूपनगाष्टचंद्राः १८७१२०८०८६४००००००० ब्रह्मांडसंपुटपरिभ्रमणं समं

तादभ्यंतरे दिनकरस्य करप्रचारः ९१ इति श्री सूर्यसिद्धांते भूगोलाध्याये द्वादशः १२

अथ गुप्तप्रश्नो चेदेशो स्यात: शुचिरलंकृतः संपूज्य भास्करं भक्त्या ग्रहभान्यथ गुह्यकान् १

शिरोमणौ १८७१२०६९२००००००००० उभ अंतरं ११६६०४००००००

अर्कलग्नः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

क्रांत्यर्थं ध्रुवद्वयासक्तवृत्तानि तैर्द्दलितैः राशितैः रनेकै रहोरात्रवृत्तैः विक्षेपार्थं कदंबद्वयासक्तवृत्तानि तैर्द्दलितैः रने
कैः क्रांतिवृत्तानुकारिवृत्तैर्द्दक्षिणोत्तरं न्यस्तैरुपलक्षितं गोलं कुर्यादिति कल्पितोर्थः = ८

पारंपर्योपदेशेन यथाज्ञातं गुरोर्मुखात् आचार्य्यः शिष्यबोधार्थं सर्वं प्रत्यक्षदर्शिवान् २ भूभ
गोलस्य रचनां कुर्यादाश्चर्य्यकारिणीं अभीष्टं पृथिवीगोलं कारयित्वा तु दारवं ३ दंडं तन्मध्य
२१ गं मेरोरुभयत्र विनिर्गतं आधारकक्षाद्वितयं कक्षां वैषुवतीं तथा ४ भगणांशांगुलैः कार्या
21 अंकितास्तिस्र एव ताः स्वाहोरात्रार्द्धकर्णैश्च तत्प्रमाणानुपाततः ५ क्रांतिविक्षेपभागैश्च
दलितैर्द्दक्षिणोत्तरं स्वैः स्वैरपक्रमैस्तिस्रो मेषादीनामपक्रमात् ६ कक्षाः प्रकल्पयेत्ताश्च
कर्क्यादीनां विपर्ययात् तद्वत्तिस्रस्तुलादीनां मृगादीनां विलोमतः ७ याम्यगोलाश्रिताः का
र्याः कक्षाधारद्वयोपरि याम्योदग्गोलसंस्थानां भानामभिजितस्तथा ८ सप्तर्षीणामग
स्त्यस्य ब्रह्मादीनां प्रकल्पयेत् मध्ये वैषुवती कक्षा सर्वासामेव संस्थिता ९ तदाधारयुतेर्भा
द्वे अयने विषुवद्द्वयं विषुवस्थानतो भागैः स्फुटैर्भगणसंचरात् १० क्षेत्राण्येवमजादीनां
तिर्यक्ज्याभिः प्रकल्पयेत् अयनादयनं चैव कक्षास्तिर्यग्यथापरं ११ क्रांतिसंज्ञतया सू २१
र्यः सदा पर्य्येति भासयन् चंद्राद्याश्च स्वकैः पातैरपमंडलमाश्रितैः १२ ततोपकृष्टा दृश्यं
ते विक्षेपांतेष्वऽपक्रमात् उदयक्षितिजे लग्नमस्तं गच्छति तद्वशात् १३ लंकोदये यथास्ति

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

क्षितिजेन=२

खमध्योपरिमध्यगं मध्यक्षितिजयोर्मध्ये याज्या सा त्वाभिधीयते १४ ज्ञेयं चरदल
ज्या तु विषुवत्क्षितिजान्तरं हृत्वोपरि स्वकं स्थानं मध्ये क्षितिजमंडलं १५ वस्त्रच्छन्नं वहि तुंग=३ तुंगो
श्चापि लोकालोकेन वेष्टितं अमृतश्रावयोगेन कालभ्रमणसाधनं १६ गुणवीज महादेवः=२
समायुक्तं गोलयंत्रं प्रसाधयेत् गोप्यमेतत्प्रकाश्योक्तं सर्वगम्यं भवेदिह १७ तस्मा
द्गुरूपदेशेन रचयेद्गोलमुत्तमं युगे युगे समुत्पन्ना रचनेयं विवस्वतः १८ प्रसादात्कस्य
चिद्भूयः प्रादुर्भवति कालतः कालसंसाधनार्थाय तथा यंत्राणि साधयेत् १९ एकाकीयो
जयेद्वीजं यंत्रं विस्मयकारणं शंकुयष्टिधनुश्चक्रैः छायायंत्रैरनेकधा २० गुरूपदेशा
द्विज्ञेयं कालज्ञानमतंद्रितैः तोययंत्रैः कपालाद्यैर्मयूरनरवानरैः ससूत्ररेणुगर्भैश्च
क्षि सं= सम्यक्कालं प्रसाधयेत् पारदाराम्बुसूत्राणि शुल्वतैलजलानि च २२ वीजानि पांशवस्ते
षां प्रयोगाः प्रेऽतिदुर्लभाः ताम्रपात्रमधःछिद्रं न्यस्तं कुंडेमलांभसि २३ षष्टिमज्जत्यहोरा
त्रे स्फुटं यंत्रं कपालकं नरयंत्रं तथा साधु तथा च विमले रवौ २४ छायासंसाधनैः प्रोक्तैः
कालसाधनमुत्तमं यंत्रैरष्टादशविधैः सम्यक्कालं प्रसाधयेत् २५ ग्रहनक्षत्रचरितं ज्ञात्वा

दिवा=२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गोलंचतत्त्वतः ग्रहलोकानवाप्नोति पर्यायेणात्मवान्नरः २६ इतिश्रीसूर्यसिद्धांते ज्योतिषोप
निषधंयंत्राध्यायस्त्रयोदशः १३ ब्राह्मंदैवंतथापित्र्यंप्राजापत्यंगुरोस्तथा सौरंचसावनंचांद्र
२२ मार्क्षमानानिवैनव १ चतुर्भिर्व्यवहारोच सौरचांद्रार्कसावनैः बार्हस्पत्येनषष्ठ्यब्दंज्ञेयंना
22 न्यैस्तुनित्यशः २ सौरेणद्युनिशोर्मानंषडशीतिमुखानिच अयनंविषुवंचैवसंक्रांतेःपुण्यकाल
ता ३ भचक्रपरिवर्त्तैर्निर्मानोदैवसुरद्विषां अहोरात्रंकृतादीनांसंख्याज्ञेयायथोदिता ४ तुलादि
षडशीत्यंशाषडशीतिमुखंदिनं तच्चतुष्टयमेवंस्याद्द्विःस्वभावेषुराशिषु ५ षड्विंशेधनुषोभा
गेद्वाविंशेऽनिमिषस्यच मिथुनाष्टादशेभागेकन्यायाश्चचतुर्दशे ६ ततःशेषाणिकन्याया
यान्यहानितुषोडश क्रतुभिस्तानितुल्यानिपितॄणांदत्तमक्षयं ७ भचक्रनाभौविषुवद्वित
यंसमसूत्रगं अयनद्वितयंचैवचतस्त्रःप्रथितास्तुताः ८ तदंतरेषुसंक्रांतिद्वितयंद्वितयंपुनः २२
नैरंतर्यात्तुसंक्रांतेर्ज्ञेयंविष्णुपदीद्वयं ९ भानोर्मकरसंक्रांतेःषण्मासाउत्तरायणं कर्क्यादे
स्तुतथैवस्यात्षण्मासादक्षिणायनं १० द्विराशिनाथाऋतवस्ततोपिशिशिरादयः मेषादयो
द्वादशैतेमासास्तैरेववत्सरः ११ अर्कमानकलाःषष्ट्यागुणिताभुक्तिभाजिताः तदर्द्धनाड्यः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

संक्रांतेर्ख्यर्कपुण्यतमाः परे १२ अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी तच्चांद्रमानमंशैस्तैर्ज्ञे
या द्वादशभिस्तिथिः १३ तिथिः करणमुद्वाहः क्षौरं सर्वास्तथा क्रियाः व्रतोपवासयात्राणां क्रिया चांद्रेण
गृह्यते १४ त्रिंशद्भिस्तिथिभिश्चांद्रो मासः पित्र्यमहः स्मृतं निशा च मासपक्षांते तयोर्मध्ये विभागतः १५
भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वांतयोगतः १६ कार्त्तिकादिषु संयो
गे कृत्तिकादि द्वयं द्वयं अंत्योपांत्यौ पंचमश्च त्रिभिर्मासत्रयं स्मृतं १७ वैशाखादिषु कृष्णे च योगः पंचदशी
तिथौ कार्त्तिकादीनि वर्षाणि गुरोरस्तोदयात्तथा १८ उदयादुदयं भानोः सावनं तत्प्रकीर्तितं सावनेन स्यु
रेतानि यज्ञकालविधिस्तु तैः १९ सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा मध्यमग्रहभुक्तिश्च सावने
न गृह्यते २० सुरासुराणामन्योन्यमहोरात्रं विपर्ययात् यत्प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात् २१ म
न्वंतरव्यवस्था च प्राजापत्यमुदाहृतं न तत्र द्युनिशोर्भेदो ब्राह्मः कल्पः प्रकीर्तितः २२ एतत्ते सर्वमाख्यातं र
हस्यं परमाद्भुतं ब्रह्मैतत्परं ज्ञानं सर्वपापप्रणाशनं २३ दिव्यं चर्क्षग्रहाणां च दर्शितं ज्ञानमुत्तमं वि
ज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतं २४ इत्युक्त्वा मयमामंत्र्य सम्यक् तेनाभिपूजितः दिवमा
क्रम्य चार्कांशः प्रविवेश स्वमंडलं २५ मयोथ लब्धा तत्ज्ञानं दिव्यं साक्षाद्विवस्वतः कृतकृत्यमा
त्मानं मेने निर्धूतकल्मषं २६ ज्ञात्वाथ ऋषयश्चाथ सूर्याल्लब्धवरं मयं परिवव्रुरुपेत्यातो ज्ञानं पप्रच्छु
दरितो विधिवत्ततः २७

मनूनां प्रजापतित्वात् =६
विवेकः =५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२३

९३

रादरात् ३७ स तेभ्यः प्रद्दौ धीतो महात्मा चरितं महत् अत्यद्भुततमं लोके रहस्यं ब्रह्मसम्मितं ३८

इति श्रीसूर्यसिद्धांते सौररहस्याध्यायश्चतुर्दशः १४ श्रीरस्तु संवत् १८८६ शाके १७५१ वै

शाखमासे सितेपक्षे त्रयोदश्यां तिथौ शनौ वारे शास्त्रमिदं सूर्यसिद्धांताख्यं सुनामवासिस

भाचंद गौजरी ब्वली लिखत शुभमस्तु

॥उदीरितोर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहंति नोदिताः। अनुक्तमप्यूहति पंडितो जनः परेंगितज्ञानफला हि

बुद्धयः ।१। रेरे कोकिल माभज मौनं किंचिदुदंचय पंचमरागं। नोचेत्वामिह को जानीते काककदंबकपिहिते न्हते।२। सुज

नो न याति वैरं परहितबुद्धिर्विनाशकालेपि। छेदेपि चंदनतरुः सुरभयति मुखं कुठारस्य।३। अमृतं किरति हिमांशुर्विष

मेव फणी समुद्गिरति। गुणमेव वक्ति साधुर्दोषमसाधुः प्रकाशयति।४। अष्टदशांगधूपं। षड्भागकुष्ठं मुरदुःतां गुडश्च

लाक्षां त्रयं पंच नखस्य भागाः। हरीतकी सर्जरसः समांसी भागैकमेकं त्रिलवैः शिलाजं। धनस्यचत्वारि पुरस्यचैको धूपो

दशांगः कथितो मुनींद्रैः ।१। संगमे दहति मानसमेको विप्रयोगसमये पुनरन्यः। तापकारणमुभावपि मन्ये दुर्जनास्सुजनयोर्न

विशेषः ।१। उरस्तादिरसाद्दघ्ना मनसा क्वसातथा। पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोष्टांग उच्यते।१। उत्तमर्णधनदानवशां क

या पावको त्यागिरवयाहृदिस्थया। दवदग्धवनमानसखलीनाममालोवलिंदितेनजया।१। जातविघोगुरुर्दृष्टिजातभा

२३

CC-0. Dharmartha Trust J&K. An eGangotri-Vaidika Bharata initiative